ಧಾ ಪು ಕಾ ವಿ ವಳ್ಳೀ.


THE

DHÂTURÛPA MUKTÂVALÎ

OR

A HAND-BOOK OF SANSKRIT GRAMMAR

CHIEFLY INTENDED FOR USE IN HIGH SCHOOLS AND COLLEGES



BY

P. K. DURAISWAMI IYENGAR,
Sanskrit Pandit, Hindu High School, Triplicane, Madras.



Madras:
PUBLISHED BY THE SARASVATI PUBLISHING HOUSE,
15, POPHAM'S BROADWAY.

1909.

PRICE: Re. 1 As. 8. (Postage Extra.)

PRINTED AT THE
ST. JOSEPH'S COLLEGE PRESS,
TRICHINOPOLY.

श्रीरस्तु ।

धातुरूपमुक्तावळी ।



कैरविणीतीरविराजमानायां हिन्दुपाठशालायां गीर्वाण्युपदेष्ट्रा
श्रीशैलार्यापराभिधानेन

पि. के. दुरसाम्यय्यंगार्येण

विरचिता ।




चेन्नपुर्यां
सरस्वतीप्रकटनशालायां प्रथिता ।

१९०९

मूल्यम् सार्धैकरौप्यम् ।] [मार्गव्ययः पृथक् ।

त्रिशिरःपुरे
सैण्ट् जोसप्स् कालेज् मुद्रायन्त्रालये मुंद्रिता सती
विजयतेतराम् ।

SELECTED OPINIONS.



PURASAVAKAM,
Madras, 29-6-09.

Dear Sir,

I went through a few pages of your Dhaturupamuktavali. It is just the sort of Grammar that we want for High Schools.

Yours truly,
(Sd.) R. KRISHNAMACHARIAR,
Sub. Asst. Inspector of Sanskrit Schools.

I have read portions of Dhaturupamuktavali composed by Mr. Doraisamy Iyengar, Sanskrit Pandit of the Hindu High School, Triplicane. I am of opinion that the work will be very useful to all Sanskrit students studying Grammar. His long experience as a Sanskrit teacher of students preparing for University examinations, has enabled him to understand thoroughly their real difficulties, and he has spared no pains to give to them, what may be appropriately called " A Made-easy Sanskrit Grammar." I wish him success.

(Sd.) K. KRISHNASWAMI RAU,
5-7-09. *Retired Dewan of Travancore.*

TRIPLICANE,
Madras, 13-5-09.

Mr. P. K. Duraiswami Iyengar—Hindu High School, Triplicane,—has at last supplied a long-felt want in the field of Sanskrit grammatical learning by the publication of his Dhaturupamuktavali. This is almost the first successful attempt to present the enigmatic aphorisms of Panini in a readable form and to suit the modern method of grammatical study. The plan is original, the expression lucid, and the scope comprehensive. I trust that his work will command the appreciation and patronage it highly deserves.

(Sd.) M. KRISHNAMACHARIAR, M.A., B.L.,
M. R. A. S, F. R. S. A.,
High Court Vakil.

TRIPLICANE,
Madras, 13th July 1909.

Mr. Doraiswami Iyengar has laid the whole Sanskrit student population under great obligation by writing for them just the sort of Grammar that modern system of education requires. The course of study, as outlined by him in his Dhaturupamuktavali, will, if followed, make the High School Student master in a practical way of a major portion of Sanskrit Grammar, a subject which, I fear, is little understood and very often neglected. I wish the book all success.

(Sd.) K. KRISHNASWAMI IYENGAR
Sanskrit Pundit, Madras Christian C...

OPINIONS.—(*continued.*)

ADYAR, MADRAS (India),
17th July, 1909.

My Dear Sir,

I am glad to have seen 'Dhaturupamuktavali.' This is a most remarkable attempt at combining the European with the Indian method, and I should think that a book like yours might be welcomed even in the west as a useful complement of the elementary course of Sanskrit. I wish you every kind of success.

Yours sincerly,
(Sd.) F. OTTO SCHRADER, PH. D.,
Director of the Adyar Library.

अद्राक्षमहं वैयाकरणसिद्धान्तसौधनिश्रेणिकां धातुरूपमुक्तावळीं नाम श्रीमतां पण्डितवर्यदुरसाम्यय्यङ्गार्याणां कृतिम् । हौण्यध्ययनबद्धश्रद्धानां सर्वेषामपि अनायासेन गैर्वाणीमवतारयितुमुपकरोति हस्तावलम्बमिति नैतावदेवास्माकं प्रमोदस्थानम् । अपितूपविंशान् वत्सरान् कैरविणीतीरविराजमानायां हिन्दूकलाशालायां गैर्वाण्यध्यापनकृतपरिश्रमाणाम् अमीषां दुरसाम्यय्यङ्गार्याणां परिचयसम्पादिताया बोधनाचातुर्याः परीवाहभूतेयं कृतिरध्यापकानामपि बोधनापरिक्लेशं शिथिलयतीति नितरां हृष्यामः । अस्यां च प्रकरणोपरचनानि प्रासादसोपानानीव सुगमानि अनन्यसापेक्ष्याणि दृढतरप्रमाणोपष्टम्भानि च बालानामपि सुबोधानीत्यत्र न कोऽपि विशयः । तदिमां कृतिं निर्मत्सरं सकरुणं च विलोक्य सहृदयाः पण्डितास्सर्वेऽप्यैकरस्येनानुगृह्य प्रोत्साहयेयुरेतादृशकृतिप्रणयिनः पण्डितानिति सादरातिशयमाशंसामहे ॥

चेन्नपुरी,
१९–५–०९.

वि. अनन्ताचार्यः,
संस्कृतपण्डितः, सि. यस्. यम्. कालेज् ।

V. ANANTHACHARIAR,
Sanskrit Pundit, C. S. M. College, Madras.

श्रीमद्दुरसाम्यार्यैः रचितेयं धातुरूपमुक्ताळी । अर्हा बालमनीषां विशदयितुं नूनमित्युदीक्षेऽहम् ॥

चेन्नपुरी,
२–६–०९.

इत्थं—श्वेतारण्यं नारायणशास्त्री,
संस्कृतप्राथमिकोपाध्यायः, पच्चैयप्पन् कालेज् ।

SWETHARANYAM NARAYANA SASTRIAR,
Head Sanskrit Pundit, Pachayappa's College, Madras.

कैरविणीतीरवासिभिः महाशयैः स्थापितायां चिरप्रवृत्तायां हिन्दुविद्याशालायां संस्कृताध्यापकैः दुरसाम्यय्यङ्गार्यपण्डितवर्यैः विरचितेयं धातुरूपमुक्तावळी मया व्यलोकि । अत्र प्राचीनवैयाकरणसमयानुसारेण सन्धिप्रकरणादारभ्य तत्र तत्र स्थलेषु मुख्यतमानि सूत्राणि सोदाहरणानि आंग्लभाषाविवरणेन सह सम्यक् प्रपञ्चितानि । एतादृशललितग्रन्थदौर्लभ्येन संस्कृतभाषाध्ययनात् पराजयमानान् व्युत्पित्सून् बालकान् तदध्ययने प्रोत्साहयेदिति प्रत्येमि । किं चेयं सहृदयानां पण्डितानामपि बोधनाविषये लघयेदिति निश्चप्रचं मन्यामहे ॥

चेन्नपुरी,
२–६–०९.

इति—कृष्णमाचार्यः,
रायपेटांग्लविद्याशालायां संस्कृताध्यापकः ।

KRISHNAMACHARYAR,
Sanskrit Pundit, W. M. College, Rayapettah, Madras.

OPINIONS.—*(continued.)*

स्वस्ति । श्रीशैलार्यापराभिधानेन श्रीमता दुरसाम्यय्यङ्गार्येण ग्रथिता धातुरूपमुक्तावळी मया सादरं व्यलोकि। सेयं मुक्तावळीव हृदयङ्गमा न केवलं बालानां प्रौढानामपि प्रीतये कल्प्यत इत्युक्तिर्भूतार्थव्याहारतां नातिक्रामति । सन्धिसमाससुबन्तादिशिक्षणमात्रानुषङ्गप्राप्तमपि पर्याप्तमेव विनेयानां जिज्ञासां प्रशमयितुम् । एषु दिवसेषु निबन्धान्तरैः प्रवृत्तैः कृतकरतामेतद्ग्रन्थरचनापरिश्रमः कृतिकृतो नासीदतीति मे निश्चयः ॥

शब्दानुशासनकृते कृतसंविधानाऽप्यर्थोपपत्तिमपि साधयितुं समर्था ।
युक्ताऽपि धातुनिवहैरिह धातुरूपमुक्तावळी कृतिरियं कृतिनां हिताय ॥

कुम्भघोणम्,
२०-७-०९.

इति तिरुमल ईचम्बाडि, शतावधानं **श्रीनिवासाचार्यः,**
कुम्भघोणस्थराजकीयविद्यालयसंस्कृतपण्डितः ।

T. E. SRINIVASACHARIAR,
Satavadhanam, Sanskrit Pundit, Govt. College, Kumbakonam.

केवलवैयाकरणा नालं बोधयितुमांग्लेय्या । तद्भाषया विनार्थान्नायतनास्सम्यगवयन्ति ॥ १ ॥
एवं मिथो विरोधाद्व्युत्पत्सुषु भूरि खिद्यमानेषु । तेषां सौकर्यार्थी तदुभयभाषाविशेषज्ञः ॥ २ ॥
शब्दार्णवे गभिरे पाणिनिवाक्छुक्तिसम्भृतैर्मणिभिः । दुरसामिकविरग्रथ्नात्स्रजमांग्लेयीप्रवाळकृतशोभाम् ॥ ३ ॥
मुक्तावळीमिमां ये कण्ठाभरणं वितन्वन्ति । तेषां शाब्दिकसङ्ख्या नातिविलम्बेति लक्ष्मणो मनुते ॥ ४ ॥

चेन्नपुरी,
२३-७-०९.

इत्थम्—**लक्ष्मणसूरिः,**
पच्चयप्पपाठशालासंस्कृताध्यापकः ।

M. LAKSHMANA SASTRIAR,
Sanskrit Pundit, Pachaiyappa's High School, Madras.

to

subject as to enable

Page 207 - 1
Page 102 - 2
84 3
85 - 3
72 - 4
- 5
751 - 15
[illegible]
[illegible] - 142

S. Subramaniam.

PREFACE.




COUNTLESS treatises have been written on Sanskrit Grammar—a subject raised to the dignity of a science by Panini and endowed with an imperishable perfection of shape and outline by the labours of the 'three sages,' each bearing the stamp of the individuality of the author and adapted to the special end he had in view. We have hand-books in almost all the leading Indian and European languages on the subject, but we are mainly concerned with those in English and Sanskrit. Our ancient commentators took up the science as a fascinating intellectual study and commented on it with extraordinary erudition and subtlety; and an intimate acquaintance with their works is indispensable for any real mastery of the subject. But the students of our High Schools and Colleges have, ordinarily, neither the time, nor the application, nor the power of grasp necessary to master the intricate structure and elaborate terminology of this science of sciences. Moreover, owing to the exigencies of their educational course, they are obliged to make their acquaintance with the Sanskrit language through the medium of English and to have recourse to treatises in English for their knowledge of Sanskrit Grammar. These treatises fall mainly into two kinds. those primarily addressed to European scholars and students, and those intended for Indians. The former are obviously unsuitable for the needs of our students. In the latter, intelligent and admirably ingenious attempts have been made to impart grammatical knowledge divested as far as possible of all technical treatment. But experience revealed a grave defect in this mode of handling the subject; and it was found that the student was often bewildered by the multitudinous rules, exceptions and counter-exceptions and dry lists of anomalous forms which he was unable to retain in his memory. Then the value of the mnemonic brevity and scientific terminology of the Sanskrit treatises become more widely understood, and attempts have been made of late to effect a compromise which aims at avoiding the defects of either treatment and retaining the excellences of both. My long experience as a teacher has convinced me that this is a move in the right direction, and this, my present hand-book, is my humble contribution on the matter. It is primarily intended for the use of High School students. Its main aim has been to combine brevity with clearness, and especially to so present the subject as to enable

the students to assimilate readily, and carry in their memory easily, the cardinal points of Sanskrit Grammar. I have also tried to be simple in style, to avoid elaborateness and intricacy of treatment, and to keep out of the book all recondite and out-of-the-way information. In carrying out this attempt, I am aware that I have, here and there, sacrificed idiom and finical accuracy of definition to intellegibility and clarity and that some portions of the book might be found fault with for not being sufficiently full. The book, however, is not intended to displace other recognised text-books, but only to serve as an aid to the student in mastering them; and I shall be highly gratified if it succeeds in any measure in drilling into the minds of our students the fundamental outlines of the subject. No one is more acutely aware of the defects of the book than myself, and any suggestions will be gratefully received and incorporated in the next edition, if there should be one. Further details regarding the scope and arrangement of the work are given in the Sanskrit Introduction that follows.

TRIPLICANE,
31st May, '09.

THE AUTHOR.

उपोद्धातः ।



विदितमेवेदं विद्वन्मणीनाम् यद्भगवत्पाणिन्युपज्ञं व्याकरणशास्त्रं बहुभिः पण्डितैः बह्वीषु भाषासु बहुभिः प्रकारैः स्वस्वधिषणाचातुरीमनुसृत्य विवरीक्रियत इति; सेयं व्याकृतिः भागीरथीव कुल्याभिः कृषीवलानाम्, बहूपकरोति गैर्वाणभाषाव्युत्पित्सूनां संक्षिप्तैः विस्तृतैश्च स्वविषयैः। निस्समाभ्यधिकशेमुषीविशेषैः श्रुतिपरिगृहीततया समधिरूढप्राशस्त्यायाः अस्याः गैर्वाण्याः वाण्याः अनुजिघृक्षया दिव्यलोकाद्भुवमवतीर्णैः त्रिभिर्मुनिभिः चिरतरविचारस्थिरीकृतेऽस्मिन् शास्त्रे रेखामात्रमपि न तेषां सरणिम् अतिचलितुं प्रभवामो वयम् अल्पाल्पचैतन्यसाराः। किन्तु चिरतरपरिचयसञ्जातस्तद्गभीरिमास्वादः किञ्चिद्विलेखयति निर्भयत्रपमस्मान्। तत्र च आंग्लेयभाषामवलम्ब्य गैर्वाणीमिमां गिरम् अवतितीर्षूणां स्वासाधारणीभिः दुर्ज्ञेयाभिः संज्ञाभिः परिभाषाभिश्च निपुणमतिभिरपि दुरवगाहे अस्मिन्पाणिनीये प्रवेशमतिकृच्छ्रसाध्यमाकलय्य यथामति सुखप्रबोधाय वयं प्रावर्तिष्महि। तत्र "श्रेयांसि बहुविघ्नानि" इति प्राचाम् अनुभूतनिर्गताम् उक्तिं अनुसृत्य मङ्गलशतैरपि दुरुपशमान् विघ्नाननुभूतवन्तो वयं तत्र तत्र प्रक्रियाप्रकरणेषु बहुभिः पण्डितैस्सह समासादितेषु प्रज्ञापरिश्रमेष्वपि नितरामप्रतीत चेतसो वर्तामहे। तदहमभ्यर्थये करुणैकप्रवणमानसानि पण्डितप्रकाण्डानि, "गच्छतः स्खलनं न दोषाय" इति समाधाय तत्र तत्र समुपलब्धानि स्खलनानि मयि निवेद्य संशोधयितुम्। अत्र परिकल्पिताः विषयविभागाश्च एवम्—प्रथमं संज्ञाप्रकरणे साधारणतया काश्चित्संज्ञाः प्रदर्शिताः। द्वितीये सन्धिप्रकरणे उत्सर्गापवादशास्त्राणि चिरतरमालोड्य बहुविधाः सन्धिभेदाः प्राकाशिषत। तृतीये समासप्रकरणे प्राचीनान्येव समासकुसुमावळीपद्यानि तत्तत्समासोदाहरणकोटौ निक्षिप्तानि। चतुर्थे अव्ययप्रकरणे यथोचितं प्रसिद्धप्रयोगाणि अव्ययपदानि उदाहृतानि। पञ्चमे तिङन्तप्रकरणे लकारार्थाः विकरणभेदाः परस्मैपदात्मनेपदप्रत्ययविभागाश्च अध्येतॄणाम् अत्यन्तोपयोगितया सुबोधतया च निरूपिताः। षष्ठे तु आर्धधातुकप्रकरणे इडागमसम्प्रसारणादीनि सिद्धान्तकौमुदीप्रकारानुसारेण संगृह्य यथामति परिष्कृताः। सप्तमे धातुरूपप्रकरणे लक्ष्येषु भूयांसमुपयोगमुपेयुषां धातूनां समग्राणि रूपाणि प्रदर्शितानि। अष्टमे तु बालानां यथोपयोगं कारकप्रक्रिया, भावकर्मप्रक्रिया, णिजन्तप्रक्रिया, सन्नन्तप्रक्रिया, उपसर्गप्रयोगादिविधयश्च, संग्रहेण प्रत्यपादिषत। नवमे सुबन्तरूपाणि प्रदर्शितानि। तत्र प्रक्रियाप्रतिपादनपूर्वकं रूपज्ञानस्य दुरवापतया बालानां निष्पन्नान्येव धातुरूपाणि सम्यक् बोधयित्वा तदुपरि साधुत्वासाधुत्वविवेकायैव व्याकृतिः प्रमाणीकरणीयेति अतिनवीनानां पण्डितानामाशयमनुसृत्य मयाऽयं परिष्कारविधिः प्रारम्भि।

भो भो महाशयाः विद्वन्मणयः! कृतावस्थां परिज्ञाताः न्यूनातिरेकाः मयि निवेद्य संशोधयितव्या इति सानुनयम् अभ्यर्थयते सहृदयानां निर्मत्सराणां सुधियामनुचरः।

इति—श्रीशैलार्यापराभिधान दुरसाम्यय्यङ्गार्यः।

इत्थं बालाः अध्यापयितव्याः।

THE COURSE OF STUDY.

(*As drawn by the Author, to be pursued in reference to the instruction of boys in Sanscritic lore.*)

प्रथमशाखायाः—प्रथमभागे संज्ञाप्रकरणम्, नवमभागे संख्येयवाचकाः ।

I Form.—1st Chapter (Samgyaprakarana), and 9th Chapter (Numerals).

द्वितीयशाखायाः—द्वितीयभागे अच्सन्धिः, नवमभागे सर्वनामावधयश्शब्दाः ।

II Form.—2nd Chapter (Vowel Sandhi), and 9th Chapter (Declension of Substantives up to Pronouns).

तृतीयशाखायाः—द्वितीयभागे हल्सन्धिः, नवमभागे समस्ताश्शब्दाः ।

III Form.—2nd Chapter (Sandhi of Consonants), and 9th Chap. (all the Sabdas.)

चतुर्थशाखायाः—तृतीयभागे समासकुसुमावलिः, तुरीयभागे अव्ययप्रकरणम्, पञ्चमभागे तिङन्तप्रकरणम्, सप्तमभागे शब्विकरणधातवः ।

IV Form.—3rd Chapter (Compounds), 4th Chapter (Avyaya Prakarana), 5th Chap. (Tignantha Prakarana), and 7th Chap. (Roots of the 1st Conjugation).

पञ्चमशाखायाः—षष्ठभागे इडागमप्रकरणादि, सप्तमभागे लुग्विकरणादयः ।

V Form.—6th Chap. (the Augment इ etc.), and 7th Chapter (Roots of the 2nd to 10th Conjugation.)

षष्ठशाखायाः—अष्टमभागे कारकप्रकरणादि, सप्तमभागे कर्मणिसन्नन्तणिजन्तादयः ।

VI Form.—8th Chap. (the Karakas etc.), and 7th Chapter (the Passive, Desiderative, Causal, etc.)

विषयानुक्रमणिका ।

CONTENTS.



PAGE.

CHAPTER I.

CHAPTER II.

CHAPTER III.

CHAPTER IV.

CHAPTER V.

PAGE.

CHAPTER VI.

CHAPTER VII.

CHAPTER VIII.

CHAPTER IX.

ERRATA.

PAGE		FOR		READ	
PAGE	7	FOR	तड्डक्कुरः (Line 16)	READ	तड्ढक्कुरः
„	12	„	गृह् + आनि (Line 19)	„	गृह + आनि
„	59	„	अभृषत् (Line 20)	„	अभृषत
„	59	„	समास्थिष्महि (Line 25)	„	समस्थिष्महि
„	61	„	अपश्यतम (Imperfect 2nd person plural)	„	अपश्यत
„	121	„	स्तुवै, स्तुवावहै, स्तुवामहै (Impera. 1st pers.)	„	स्तवै, स्तवावहै, [स्तवामहै
„	142	„	अहौषु (Aorist 3rd person plural)	„	अहौषुः
„	185	„	bublish (1st line)	„	publish
„	„	„	प्रथवामहै (Imperative 1st person plural)	„	प्रथयामहै
„	„	„	प्रथमेवहि (Potential 1st person plural)	„	प्रथयेवहि
„	189	„	पालयिष्येते (2nd Future 3rd person dual.)	„	पालयिष्येथे
„	190	„	गम्येथाम् (Potential 2nd person dual)	„	गम्येयाथाम्
„	197	„	अचेक्रीयर्थाः (Imperfect 2nd person singular)	„	अचेक्रीयथाः
„	204	„	वर्धिष्यते (2nd Fut. 3rd pers. sing. of वृध् Atm.)	„	वर्त्स्यति
„	„	„	अवर्धिष्यत् (Conditional of वृध्)	„	अवर्त्स्यत्
„	206	„	अचेषीत् (Aorist 3rd pers. sing. of चि Paras.)	„	अचैषीत्
„	208	„	अगृह्णीत् (Imperfect 3rd pers. sing. of ग्रह् Atm.)	„	अगृह्णीत
„	229	„	स्वसारो (Accusative dual of स्वसृ Sabda)	„	स्वसारौ
„	230	„	मरुते (Instru. sing. of मरुत् Sabda)	„	मरुता
„	238	„	एकस्मात् (Fem. of एक Sabda)	„	एकस्याम्
„	240	„	एकचतवरिंशः (Column 2 line 7)	„	एकचत्वारिंशः

S. Subrahmanya Sastry

श्रीरस्तु ।

॥ धातुरूपमुक्तावळी ॥

CHAPTER I.

संज्ञाप्रकरणम् ।

I. In Sanskrit there are *fifty* letters, Anusvara and Visarga being taken into account = गैर्वाण्यां भाषायाम् अक्षराणि पञ्चाशत् ।

II. In the Sanskrit language, there are *thirteen* Vowels = तत्र अचः त्रयोदश ।

III. In Sanskrit, there are *five* Short Vowels = तत्र ह्रस्वाचः पञ्च ; अ, इ, उ, ऋ and ऌ ।

IV. In Sanskrit, there are *eight* Long Vowels = दीर्घाचः अष्ट ; आ, ई, ऊ, ॠ, ए, ओ, ऐ and औ ।

V. Sanskrit has *thirty-seven* Consonants = हलः सप्तत्रिंशत् ; कवर्ग, चवर्ग, टवर्ग, तवर्ग, पवर्ग, य, र, ल, व, श, ष, स, ह, ं; :, ᳵ (क) and ᳵ (प) ।

VI. But some maintain that the Consonants are to be counted without Anusvara and Visarga = केचित् एवं वदन्ति, षट्चत्वारिंशदिति ।

VII. The English names for the sub-divisions of Sanskrit letters are :— Gutturals, Palatals, Linguals, Dentals, Labials.

क, च, ट, त, प Unaspirate.

ख, छ, ठ, थ, फ Aspirate.

ग, ज, ड, द, ब Unaspirate.

घ, झ, ढ, ध, भ Aspirate.

ङ, ञ, ण, न, म Nasals.

य, र, ल, व Semi-vowels.

श, ष, स Sibilants.

ह Aspirate.

VIII. Some Sanskrit names for the subdivisions of Sanskrit letters:—

अकुहविसर्जनीयानां कण्ठः ।
इचुयशानां तालु ।
ऋटुरषाणां मूर्धा ।
लृतुलसानां दन्ताः ।
उपूपध्मानीयानाम् ओष्ठौ ।
ञमङणनानां नासिका च ।
एदैतोः कण्ठतालु ।
ओदौतोः कण्ठोष्ठम् ।
वकारस्य दन्तोष्ठम् ।
जिह्वामूलीयस्य जिह्वामूलम् ।
नासिकानुस्वारस्य ।

IX. Equivalent English names for Sanskrit cognomens:—

अचः = Vowels.
हलः = Consonants.
संयुक्तम् = Conjunct consonant.
उपधा = Penultimate letter.
ह्रस्व = Short.
दीर्घ = Long.
प्लुत = The long accent, Vowel lengthened to three Matras.
कर्ता = Agent.
कर्म = Object.
क्रियावाचक = Verb.
प्रातिपदिक = Inflected noun.
प्रत्यय = Affix.
अङ्ग = Base.
उपसर्ग = Preposition.
सुबन्त = Inflexion of nouns.
तिङन्त = Conj. of verbs.
सर्वनाम = Pronoun.
अव्यय = Indeclinable.
तुमुन्नन्त = Infinitive.
ल्यबन्त = Indeclinable past participle.
क्तान्त = Past passive participle.
शत्रन्त = Present participle of the Parasmaipada roots.
शानजन्त = Present participle of the Atmanepada roots.
गुणवाचक = Adjective.
क्रियाविशेषण = Adverb.
आङ्कितनाम = Proper nouns.
रूढनाम = Common nouns.
सङ्घवाचकनाम = Collective nouns.
द्रव्यवाचक = Material nouns.
प्रथमपुरुष = Third person.
मध्यमपुरुष = Second person.
उत्तमपुरुष = First person.
एकवचन = Singular.
द्विवचन = Dual.
बहुवचन = Plural.

CHAPTER II.

सन्धिप्रकरणम् ।

दीर्घाच्सन्धिः ।

अकस्सवर्णे दीर्घः ।

When two *similar* vowels, the last four excepted, blend, their long form takes the place of both.

EXAMPLES.

दैत्य + अरिः = दैत्यारिः ।	गुरु + ऊनः = गुरूनः ।
राम + आदिः = रामादिः ।	चमू + उदयः = चमूदयः ।
सीता + अत्र = सीतात्र ।	पितृ + ऋणम् = पितॄणम् ।
कान्ता + आश्रयः = कान्ताश्रयः ।	होतृ + ऋकारः = होतॄकारः ।
गौरी + इह = गौरीह ।	होतृ + ऌकारः = होतॄकारः ।
गौरी + ईशः = गौरीशः ।	

गुणसन्धिः ।

अद्गुणः ।

When अ or आ is followed by इ, उ, ऋ and ऌ, the Guna letters ए, ओ, अर् and अल् are respectively substituted for them.

EXAMPLES.

पल + ई = पले ।	तव + ऌकारः = तवल्कारः ।
वद + इति = वदेति ।	वध + उपायः = वधोपायः ।
धन + ईशः = धनेशः ।	देव + ऋषिः = देवर्षिः ।
रमा + ईशः = रमेशः ।	महा + ऊर्मिः = महोर्मिः ।
गङ्गा + उदकम् = गङ्गोदकम् ।	महा + ऋषिः = महर्षिः ।
तव + ऋद्धिः = तवर्द्धिः ।	महा + ईशः = महेशः ।

वृद्धिसन्धिः ।

वृद्धिरेचि । ५

When ए, ऐ, ओ and औ follow अ or आ, ऐ is substituted for both in the 1st two cases, and औ in the last two.

EXAMPLES.

तस्य + एषः = तस्यैषः ।
प्रथमा + एकवचनम् = प्रथमैकवचनम् ।
देव + ऐश्वर्यम् = देवैश्वर्यम् ।
कान्ता + ओदनम् = कान्तौदनम् ।
रमा + ऐक्यम् = रमैक्यम् ।
कान्ता + औदार्यम् = कान्तौदार्यम् ।
एक + एकम् = एकैकम् ।
महा + ओजाः = महौजाः ।
जल + ओघः = जलौघः ।
भव + औषधम् = भवौषधम् ।

एत्येधत्यूठ्सु ।

When अ or आ is followed by इ 'to go' and एध्, when they begin with ए and ऐ, or by ऊठ्, the corresponding Vriddhi letter is substituted for both.

EXAMPLES.

प्र + एति = प्रैति ।
प्र + एधते = प्रैधते ।
प्रष्ठ + ऊहः = प्रष्ठौहः ।
अक्ष + ऊहिनी = अक्षौहिणी ।
स्व + ईरः = स्वैरः ।
प्र + ऊढः = प्रौढः ।

यण्सन्धिः ।

इको यणचि ।

When इ, उ, ऋ and ऌ short or long are followed by a *dissimilar* vowel, य्, व्, र् and ल् respectively take their place.

EXAMPLES.

दधि + अत्र = दध्यत्र ।
सुधी + उपास्यः = सुद्ध्युपास्यः ।
तृणानि + अत्ति = तृणान्यत्ति ।
अति + ऊर्ध्वम् = अत्यूर्ध्वम् ।
अपि + एवम् = अप्येवम् ।
मधु + अरिः = मध्वरिः ।
गुरु + आगमः = गुर्वागमः ।
पितृ + अंशः = पित्रंशः ।
अग्नि + उत्पातः = अग्न्युत्पातः ।
पितृ + आज्ञा = पित्राज्ञा ।

---

5 पूर्वरूपसन्धिः ।

एङः पदान्तादति ।

When ए or ओ at the end of a word is followed by अ, the latter merges into the former and its presence is denoted by the sign ऽ (Avagraha.)

EXAMPLES.

ते + अत्र = तेऽत्र ।
हरे + अव = हरेऽव ।
प्रभो + अत्र = प्रभोऽत्र ।
कवे + अवेहि = कवेऽवेहि ।
साधो + अनुमन्यताम् = साधोऽनुमन्यताम् ।
विष्णो + अव = विष्णोऽव ।

---

6 पररूपसन्धिः ।

एङि पररूपम् ।

When a preposition ending in अ is followed by a root beginning with ए or ओ, the former merges into the latter.

EXAMPLES.

प्र + एजते = प्रेजते ।
उप + ओषति = उपोषति ।

अयवायावादेशसन्धिः ।

एचोऽयवायावः ।

When ए, ओ, ऐ and औ are followed by any vowel, they are changed into अय्, अव्, आय् and आव् respectively; but the य् and व् of अय् etc., are optionally dropped and the two vowels thus brought together do not coalesce.

EXAMPLES.

ते + आसन् = तयासन् or त आसन् ।
ते + इह = तयिह or त इह ।
प्रभो + एहि = प्रभवेहि or पभ एहि ।
तस्मै + अदात् = तस्मायदात् or तस्मा [अदात् ।
कृष्णौ + अत्तः = कृष्णावत्तः or कृष्णा [अत्तः ।
शे + अनम् = शयनम् ।
नौ + इका = नाविका ।
भो + अनम् = भवनम् ।
भौ + उकः = भावुकः ।
हरे + एति = हरयेति or हर एति ।
साधो + आनय = साधवानय or साध आ- [नय ।
श्रियै + अर्थः = श्रियायर्थः or श्रिया अर्थः ।
रवौ + अस्तमिते = रवावस्तमिते or रवा [अस्तमिते ।

प्रकृतिभावः ।

ईदूदेद्द्विवचनं प्रगृह्यम् ।

When the dual of a verb or a noun ends in ई, ऊ or ए, these vowels do not blend with others following them.

EXAMPLES.

गिरी + आरोहन्ति = गिरी आरोहन्ति ।	गिरी + एतौ = गिरी एतौ ।
हरी + एतौ = हरी एतौ ।	भानू + आस्ताम् = भानू आस्ताम् ।
गुरू + इमौ = गुरू इमौ ।	साधू + ऊचतुः = साधू ऊचतुः ।
कपी + आगच्छतः = कपी आगच्छतः ।	लते + अत्र = लते अत्र ।
शम्भू + उपदिशतः = शम्भू उपदिशतः ।	यजावहे + इह = यजावहे इह ।
पचेते + एतौ = पचेते एतौ ।	यजेते + उभौ = यजेते उभौ ।
गिरी + इह = गिरी इह ।	आसाथे + अत्र = आसाथे अत्र ।

अदसो मात् ।

There occurs no blending, when the मी or मू of अदस् is followed by any vowel.

EXAMPLES.

अमी + ईशाः = अमी ईशाः ।	(तौ) अमू + आसाते = अमू आसाते ।

निपात एकाजनाङ् ।

Exclamations of only one vowel do not coalesce with any vowel following them.

EXAMPLES.

आ + एवं नु मन्यसे = आ एवं नु [मन्यसे ।	इ + इन्द्रः = इ इन्द्रः ।
	उ + उमेशः = उ उमेशः ।

ओत् ।

The final ओ of particles does not coalesce with vowels following it.

EXAMPLES.

अहो + ईशाः = अहो ईशाः ।	अहो + अपेहि = अहो अपेहि ।

हल्सन्धिः ।

स्तोश्चुना श्चुः ।

When स् or a letter of **तवर्ग** is followed by श् or a letter of **चवर्ग**, a letter of the latter is substituted for the corresponding letter of the former.

EXAMPLES.

रामस् + शेते = रामश्शेते ।
कृष्णस् + चिनोति = कृष्णश्चिनोति ।
सत् + चित् = सच्चित् ।
शार्ङ्गिन् + जय = शार्ङ्गिञ्जय ।
ददत् + जयति = ददज्जयति ।
तद् + चामरम् = तच्चामरम् ।
तद् + छागः = तच्छागः ।
विपद् + जालम् = विपज्जालम् ।
याच् + ना = याच्ञा ।

ष्टुना ष्टुः ।

When स् or **तवर्ग** is followed by ष् or **टवर्ग**, the former is altered to the corresponding letter of the latter.

EXAMPLES.

रामस् + षष्ठः = रामष्षष्ठः ।
कृष्णः + टीकते = कृष्णष्टीकते ।
तत् + टीका = तट्टीका ।
चक्रिन् + ढौकसे = चक्रिण्ढौकसे ।
पेष् + ता = पेष्टा ।
भवत् + टीका = भवट्टीका ।
तत् + ढक्कुरः = तड्ढक्कुरः ।
तत् + डयते = तड्डयते ।

तोर्लि ।

When a letter of the **तवर्ग** is followed by ल्, the corresponding ल् is substituted for the former.

EXAMPLES.

तद् + लयः = तल्लयः ।
विद्वान् + लिखति = विद्वाँल्लिखति ।

खरि च ।

When a final consonant is followed by a hard consonant, it is changed to the 1st letter of its class.

EXAMPLES.

ककुभ् + प्रान्तः = ककुप्प्रान्तः ।
दृषद् + पतति = दृषत्पतति ।
तद् + करोति = तत्करोति ।

खरवसानयोर्विसर्जनीयः । ३

At the end of words, स् followed by any letter or not, and र् followed by a hard consonant or by nothing, are changed to a visarga.

EXAMPLES.

वदामस् = वदामः । | पुनर् + पुनः = पुनःपुनः ।

झलाञ्जशोऽन्ते । ४

The preceding consonants, except nasals, are altered to the 3rd letter of their own varga, when followed by a vowel, a soft-consonant, or by nothing.

EXAMPLES.

वाक् + ईशः = वागीशः ।
अच् + अन्तः = अजन्तः ।
राट् + अयम् = राडयम् ।
भवत् + आदेशः = भवदादेशः ।
नगरात् + आगच्छति = नगरादागच्छति ।
षट् + अब्जानि = षडब्जानि ।
चित् + रूपम् = चिद्रूपम् ।

यरोऽनुनासिकेऽनुनासिको वा । प्रत्यये भाषायां नित्यम् । ५

A consonant at the end of a word or grammatical form followed by a nasal is changed to the nasal of its class optionally. This change is necessary when the nasal belongs to a suffix.

EXAMPLES.

तत् + मुरारिः = तन्मुरारिः or तद्मुरारिः ।
वाक् + महिमा = वाङ्महिमा or वाग्महिमा ।
चित् + मयम् = चिन्मयम् ।
चित् + मात्रम् = चिन्मात्रम् ।
अप् + मयम् = अम्मयम् ।

ङमो ह्रस्वादचि ङमुण्णित्यम् ।

If at the end of a word or grammatical form ङ्, ण्, न्, are preceded by a short vowel and followed by any vowel, they are doubled.

EXAMPLES.

प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा ।
सुगण् + ईशः = सुगण्णीशः ।
सन् + अच्युतः = सन्नच्युतः ।

मोऽनुस्वारः । वा पदान्तस्य ।

1. At the end of a word or particle, म् followed by a consonant in general is changed to an anuswara.

2. An anuswara is changed optionally to the nasal of the class to which the following letter belongs.

3. When followed by श्, ष्, स् or ह्, this म् is necessarily changed to an anuswara.

EXAMPLES.

सम् + गमयति = संगमयति or सङ्गमयति ।	शम् + सेवते = शं सेवते ।
त्वम् + तु = त्वन्तु or त्वं तु ।	वयम् + षट् = वयं षट् ।
किम् + करः = किङ्करः or किंकरः ।	पापम् + हरति = पापं हरति ।
परम् + शंसति = परं शंसति ।	

झयो होऽन्यतरस्याम् ।

When ह् follows the first four letters of a class, it is altered to the fourth letter of that class optionally.

EXAMPLES.

वाक् + हरिः = वाग्घरिः or वाग्हरिः ।	तत् + हितम् = तद्धितम् or तद्हितम् ।
त्विट् + हासः = त्विड्ढासः or त्विड्हासः ।	ककुब् + हसति = ककुब्भसति or ककुब्हसति ।

नश्छव्यप्रशान् ।

न् at the end of a word followed by च्, छ्, त्, थ्, ट् and ठ् is changed generally to an anuswara and a visarga. This visarga is further changed to श् before च्, छ्; to स् before त्, थ्; to ष् before ट्, ठ्.

EXAMPLES.

बिडालान् + ताडयति = बिडालांस्ताडयति ।	तान् + तान् = तांस्तान् ।
	मुनीन् + त्रायस्व = मुनींस्त्रायस्व ।
तान् + च = तांश्च ।	कस्मिन् + चित् = कस्मिंश्चित् ।
तान् + टङ्कान् = तांष्टङ्कान् ।	महान् + टङ्कारः = महांष्टङ्कारः ।

शश्छोऽटि ।

श् is changed to छ्, when it is preceded by any consonant other than ह्, a semi-vowel, a nasal, or a sibilant, and when followed by a vowel, a semi-vowel, or a nasal.

EXAMPLES.

तद् + शिवः = तच्छिवः ।	त्वत् + श्मश्रु = त्वच्छ्मश्रु ।
एतत् + श्लोकः = एतच्छ्लोकः ।	वाक् + शक्तिः = वाक्छक्तिः ।

अतो रोरप्लुतादप्लुते । हशि च ।

Visarga following अ, and followed by अ or a soft consonant, is changed to उ which with the preceding अ becomes ओ.

EXAMPLES.

रामः + अर्च्यः = रामोऽर्च्यः ।	नरः + जीवति = नरो जीवति ।

भोभगोअघोअपूर्वस्य योऽशि ।

स् or visarga, when preceded by भो, भगो, अघो (all indeclinables), or अ, short or long, and when followed by a vowel or a soft consonant, is changed to य्, which is dropped optionally before vowels and necessarily before consonants.

EXAMPLES.

भोः + देवाः = भो देवाः ।	जनाः + वदन्ति = जना वदन्ति ।
भोः + इह = भो इह or भोयिह ।	अश्वाः + धावन्ति = अश्वा धावन्ति ।
नराः + इमे = नरा इमे or नरायिमे ।	बुधः + इच्छति = बुध इच्छति ।
पुरुषाः + आगच्छन्ति = पुरुषा आगच्छन्ति ।	नृपः + उदेति = नृप उदेति ।
	नरः + एति = नर एति ।

ससजुषो रुः ।

स् or Visarga, following any vowel except अ or आ, and followed by a vowel or a soft consonant, is changed to र्.

EXAMPLES.

नृपतिः + यजति = नृपतिर्यजति ।	कविः + आयाति = कविरायाति ।
नरैः + गम्यते = नरैर्गम्यते ।	भानुः + उदेति = भानुरुदेति ।

ढो ढे लोपः । रो रि । ढ्रलोपे पूर्वस्य दीर्घोऽणः ।

When ढ् and र् are followed by ढ् and र् respectively, they are dropped, and the preceding vowel, if short, is made long.

EXAMPLES.

धूर्जटिः + रक्षति = धूर्जटी रक्षति ।	लिढ् + ढः = लीढः ।
पुनर् + रमते = पुना रमते ।	शम्भुः + रम्यः = शम्भू रम्यः ।

कुप्वोः ≍क≍पौ च ।

Visarga followed by क्, ख् and प्, फ् is retained or changed, in the instance of the first two letters to Jihvamuliya, and in the instance of the second two to Upadhmaniya.

EXAMPLES.

कः + खनति = क≍खनति ro कःखनति । | कः + पठति = क≍पठति or कः पठति ।

वा शरि । विसर्जनीयस्य सः । शर्परे विसर्जनीयः ।

Visarga followed by श्, ष्, स् is either retained or changed to श्, ष्, स् respectively. It is changed to श्, ष्, स् when followed by च् छ्, ट् ठ् and त् थ् । It is not changed when these letters are followed by a sibilant.

EXAMPLES.

रथः + सरति = रथस्सरति or रथः सरति ।	विष्णुः + त्रायते = विष्णुस्त्रायते ।
	रामः + तरति = रामस्तरति ।
कोपः + शाम्यति = कोपश्शाम्यति or कोपः शाम्यति ।	रामः + क्षाम्यति = रामः क्षाम्यति ।
	कः + त्सरुः = कः त्सरुः ।

एतत्तदोस्सुलोपोऽकोरनञ्समासे हलि ।

सः and एषः drop their visarga before any consonant.

EXAMPLES.

सः + पुरुषः = स पुरुषः ।	सः + शिवः = स शिवः ।
एषः + रुद्रः = एष रुद्रः ।	

छे च। दीर्घात्। पदान्ताद्वा। आङ्माङोश्च।

छ्, when it follows a vowel, is changed to च्छ्; optionally, when the vowel is long and at the end of a word or grammatical form ; but necessarily after मा (particle) and आ (preposition.)

EXAMPLES.

तव + छायाः = तवच्छायाः।	लक्ष्मी + छाया = लक्ष्मीच्छाया or लक्ष्मीछाया।
मा + छिदत् = माच्छिदत्।	आ + छादयामास = आच्छादयामास।
शिव + छायाः = शिवच्छायाः।	चे + छिद्यते = चेच्छिद्यते।

रषाभ्यां नो णस्समानपदे। ऋवर्णान्नस्य णत्वं वाच्यम्। अट्कुप्वाङ्नुंव्यवायेऽपि।

न् coming after ऋ, र् or ष् is changed to ण्; this change takes place even if a vowel or a semi-vowel (ल् excepted), the aspirate ह् or a letter of the guttural or labial class comes between ऋ, र्, ष् and न्. This change does not take place when न् ends a word.

EXAMPLES.

तिसृ + नाम् = तिसृणाम्।	हरी + नाम् = हरीणाम्।
चतसृ + नाम् = चतसृणाम्।	रामा + नाम् = रामाणाम्।
चतुर् + नाम् = चतुर्णाम्।	वृषा + नाम् = वृषाणाम्।
पुष् + नाति = पुष्णाति।	नरा + न् = नरान्।
गृह् + आनि = गृहाणि।	

आदेशप्रत्यययोः।

स् following a vowel except अ or आ, or a letter of guttural class, or र्, generally becomes ष्.

EXAMPLES.

वाक् + सु = वाक्षु।	कमल् + सु = कमल्षु।
हरि + सु = हरिषु।	चतुर् + सु = चतुर्षु।
करो + सि = करोषि।	वच् + सि = वक्षि।
तनु + से = तनुषे।	जागर् + सि = जागर्षि।

CHAPTER III.

॥ समासकुसुमावलिः ॥

In Sanskrit, words are derived in five ways—and they are called **समास, कृत्, तद्धित, सनादि** and **एकशेष**।

The blending of two or more words into one is called **समास** or composition. The case-endings of words to be compounded are dropped.

षोढा समासास्संक्षेपात्ते च त्रिंशद्विधाः पुनः ।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥
तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः ।
सप्तधा च बहुव्रीहिः द्विगुराभाषितो द्विधा ॥
द्वन्द्वश्चतुर्विधो ज्ञेयोऽव्ययीभावो द्विधा मतः ।
तेषां पुनस्समासानां प्राधान्यं स्याच्चतुर्विधम् ॥

१. तत्पुरुषसमासः ।
कर्मधारयसमासः ।
द्विगुसमासः ।

२. बहुव्रीहिसमासः ।
३. अव्ययीभावसमासः ।
४. द्वन्द्वसमासः ।

एतदन्तर्गतविशेषसमासाः ।

अलुक्समासः ।
नित्यसमासः ।

गतिसमासः ।
असमर्थसमासः ।

समासार्थविवरणवाक्यस्य विग्रह इति संज्ञा ।

तत्पुरुषसमासनिरूपणम् ।

In the Tatpurusha composition prominence is given to the meaning of the final word.

तत्पुरुषोऽष्टविधोऽभूत्प्रथमादिविभक्तिनञ्कृतैर्भेदैः ।
उत्तरपदजनितार्थः मुख्यस्तत्रेति पण्डितैः ख्यातः ॥

प्रथमातत्पुरुषो यथा ।

अमृतं योऽपिबद्दैत्यः तं वैकुण्ठो द्विधाऽच्छिनत् ।
राहुरुत्तरकायोऽस्य पूर्वकायोऽभवद्ध्वजः ॥

EXAMPLES.

उत्तरं कायस्य = उत्तरकायः ।
पूर्वं कायस्य = पूर्वकायः ।
अर्धं पिप्पल्याः = अर्धपिप्पली ।
—इत्यादयः ।

द्वितीयातत्पुरुषो यथा ।

दुःखातीतो भवत्येव यदि कृष्णश्रितो जनः ।
अथवान्नबुभुक्षुस्सन् मुहूर्तसुखमश्नुते ॥

EXAMPLES.

दुःखम् अतीतः = दुःखातीतः ।
कृष्णं श्रितः = कृष्णश्रितः ।
अन्नं बुभुक्षुः = अन्नबुभुक्षुः ।
मुहूर्तं सुखम् = मुहूर्तसुखम् ।
खट्वाम् आरूढः = खट्वारूढः ।
—इत्यादयः ।

तृतीयातत्पुरुषो यथा ।

मासावरस्त्वं खलु मासपूर्वः अहन्तु विद्यानिपुणो नितान्तम् ।
इतीव संसद्यभिमानिनां सदा परस्परं वाक्कलहो बभूव ॥

EXAMPLES.

मासेन अवरः = मासावरः ।
मासेन पूर्वः = मासपूर्वः ।
विद्यया निपुणः = विद्यानिपुणः ।
वाचा कलहः = वाक्कलहः ।
दण्डेन ताडितः = दण्डताडितः ।
—इत्यादयः ।

चतुर्थीतत्पुरुषो यथा ।

गृही भूतबलिं दत्ते गोसुखं तु कृषीवलः ।
दत्ते यष्टा यूपदारु कुण्डलाष्टापदं बुधः ॥

EXAMPLES.

भूतेभ्यः बलिः = भूतबलिः ।
गवे सुखम् = गोसुखम् ।
यूपाय दारु = यूपदारु ।
कुण्डलाय अष्टापदं = कुण्डलाष्टापदम् ।—इत्यादयः ।

पञ्चमीतत्पुरुषो यथा ।

पूर्वं चोरभयं प्राप्य व्याघ्रभीतस्ततः परम् ।
सुखापेतो जनस्सम्यगरण्ये निवसेत्कथम् ॥

EXAMPLES.

चोरात् भयम् = चोरभयम् ।
व्याघ्रात् भीतः = व्याघ्रभीतः ।
सुखात् अपेतः = सुखापेतः ।
वृक्षात् पतितः = वृक्षपतितः ।—इत्यादयः ।

षष्ठीतत्पुरुषो यथा ।

अधिकं राजपुरुषस्सेव्यस्सर्वमहान्यतः ।
वृक्षमूलमुपाश्रित्य जपतो देवपूजकात् ॥

EXAMPLES.

राज्ञः पुरुषः = राजपुरुषः ।
सर्वेषां महत्तरः = सर्वमहान् ।
वृक्षस्य मूलम् = वृक्षमूलम् ।
वृक्षस्य छाया = वृक्षच्छाया ।—इत्यादयः ।

सप्तमीतत्पुरुषो यथा ।

प्राश्यान्नमीश्वराधीनं स्थालीपकन्तु मानवः ।
वर्त्मन्यातपशुष्कस्सन् दानशौण्डः कथं भवेत् ॥

EXAMPLES.

ईश्वरे अधीनम् = ईश्वराधीनम् ।
स्थाल्यां पक्वम् = स्थालीपक्वम् ।
आतपे शुष्कः = आतपशुष्कः ।
दाने शौण्डः = दानशौण्डः ।—इत्यादयः ।

नञ्तत्पुरुषो यथा ।

अज्ञानात्पापमाप्नोति पापादब्राह्मणो भवेत् ।
तस्मादिच्छन्ति तत्त्यक्तुमभावायैव पण्डिताः ॥

EXAMPLES.

न अश्वः = अनश्वः ।	न ब्राह्मणः = अब्राह्मणः ।
न ज्ञानम् = अज्ञानम् ।	न भावः = अभावः ।—इत्यादयः ।

कर्मधारयसमासनिरूपणम् ।

The Karmadharaya Samasa is that particular division of Tatpurusha Samasa in which the component words are in apposition with each other.

कविभिस्सप्तविधस्स्यादित्येवं कर्मधारयः कथितः ।
तत्पुरुषान्तर्भावात्तद्वत्प्राधान्यमीरितं चास्य ॥
विशेषणं पूर्वपदे विशेष्यं तथोभयत्रापि विशेषणं च ।
यस्योपमानं परतस्तदादौ सम्भावना चाप्यवधारणा च ॥

विशेषणपूर्वपदकर्मधारयो यथा ।

नीलोत्पलानि नारीणां नयनानीव रेजिरे ।
कम्पितान्यल्पवातेन सत्सरस्सु स्थितान्यहो ॥

EXAMPLES.

नीलानि च तानि उत्पलानि च = नीलोत्पलानि ।	सन्ति च तानि सरांसि च = सत्सरांसि ।
अल्पश्चासौ वातश्च = अल्पवातः ।	रम्या च सा लता च = रम्यलता ।—इत्यादयः ।

विशेष्यपूर्वपदकर्मधारयो यथा ।

उद्वीक्ष्य यस्य मातङ्गान् घना इति मनीषया ।
मयूरव्यंसका हृष्टाः ननृतुस्तं नृपं भजे ॥

EXAMPLES.

व्यंसकाश्च ते मयूराश्च = मयूरव्यंसकाः ।	खसूचिश्चासौ वैयाकरणश्च = वैयाकरणखसूचिः ।—इत्यादयः ।

विशेषणोभयपदकर्मधारयो यथा ।

पुंसां स्नातानुलिप्तानामन्नं भोज्योष्णमेव हि ।
पश्यामीत्यब्रवीद्वैद्यः शास्त्रैर्निश्चप्रचं वचः ॥

EXAMPLES.

स्नाताश्च ते अनुलिप्ताश्च = स्नातानुलिप्ताः ।	निश्चितञ्च तत् प्रचितञ्च = निश्चप्रचम् ।
भोज्यञ्च तत् उष्णञ्च = भोज्योष्णम् ।	—इत्यादयः ।

उपमानोत्तरपदकर्मधारयो यथा ।

रामोऽयं पुरुषव्याघ्रः संवृतः कपिकुञ्जरैः ।
हनिष्यति बलाद्युद्धे रावणं राक्षसर्षभम् ॥

EXAMPLES.

पुरुषो व्याघ्र इव = पुरुषव्याघ्रः ।
कपयः कुञ्जरा इव = कपिकुञ्जराः ।
राक्षसः ऋषभ इव = राक्षसर्षभः ।
—इत्यादयः ।

उपमानपूर्वपदकर्मधारयो यथा ।

कौमुदीविशदा भाति या वाणी रतिसुन्दरी ।
लतातन्वी सदा दद्यात् सा द्राक्षामधुरां गिरम् ॥

EXAMPLES.

रतिरिव सुन्दरी = रतिसुन्दरी ।
लतेव तन्वी = लतातन्वी ।
कौमुदीव विशदा = कौमुदीविशदा ।
द्राक्षेव मधुरा = द्राक्षामधुरा ।
घन इव श्यामः = घनश्यामः ।
—इत्यादयः ।

सम्भावनापूर्वपदकर्मधारयो यथा ।

तमालवृक्षैरभितः संवृतो विन्ध्यपर्वतः ।
बम्भरैस्सकलैर्दृष्टः दूराद्गजमनीषया ॥

EXAMPLES.

तमाल इति वृक्षः = तमालवृक्षः ।
विन्ध्य इति पर्वतः = विन्ध्यपर्वतः ।
गज इति मनीषा = गजमनीषा ।
—इत्यादयः ।

अवधारणापूर्वपदकर्मधारयो यथा ।

मनीषासलिलैर्युक्तिरत्नैर्वाकल्पनोर्मिभिः ।
यशस्सरिद्भिस्सम्पन्नः भात्ययं कविसागरः ॥

EXAMPLES.

मनीषा एव सलिलानि = मनीषासलिलानि ।
युक्तय एव रत्नानि = युक्तिरत्नानि ।
कल्पना एव ऊर्मयः = कल्पनोर्मयः ।
यशांस्येव सरितः = यशस्सरितः ।
कविरेव सागरः = कविसागरः ।
विनय एव धनम् = विनयधनम् ।—इत्यादयः ।

The following according to some, is the eighth kind of **कर्मधारय** compound.

लुप्तमध्यमपदकर्मधारयो यथा ।

देवब्राह्मण एवाहमागतश्शाकपार्थिव ।
अतो मां पालय श्रान्तं पान्थं छायातरुर्यथा ॥

EXAMPLES.

देवपूजकः ब्राह्मणः = देवब्राह्मणः ।	छायाप्रधानः तरुः = छायातरुः ।
शाकप्रियः पार्थिवः = शाकपार्थिवः ।	—इत्यादयः ।

द्विगुसमासनिरूपणम् ।

The Dwigu Samasa is that particular form of Karmadharaya in which the first member is a numeral.

स चैकवद्भाव्यनेकवद्भावीति द्विधा द्विगुः ।
कर्मधारय एवास्याप्यन्तर्भावो बुधैर्मतः ॥

एकवद्भावी द्विगुर्यथा ।

पञ्चवट्या समं क्षेत्रं त्रिलोक्यां न हि विद्यते ।
तत्र पञ्चगवं दत्वा जनश्श्रेष्ठपदं व्रजेत् ॥

EXAMPLES.


पञ्चानां वटानां समाहारः = पञ्चवटी ।	पञ्चानां गवां समाहारः = पञ्चगवम् ।
त्रयाणां लोकानां समाहारः = त्रिलोकी ।	त्रयाणां भुवनानां समाहारः = त्रिभुवनम् ।
	—इत्यादयः ।

अनेकवद्भावी द्विगुर्यथा ।

युद्धेषु विबुधास्सर्वे बाडबाश्चाध्वरेष्वपि ।
गायन्ति यं कार्यसिद्ध्यै भजे षाण्मातुरं मुदा ॥

EXAMPLES.

षण्णां मातॄणाम् अपत्यं पुमान् = षाण्मातुरः ।	अष्टसु कपालेषु संस्कृतः = अष्टाकपालः ।
	—इत्यादयः ।



बहुव्रीहिसमासनिरूपणम् ।

Two or more words ending in the first case affix form a compound, denoting another new thing not connoted by those words individually; and the compound is called Bahuvrihi.

सप्तभिराख्याभिर्वा विख्यातो यस्स वै बहुव्रीहिः ।
अन्यपदार्थो मुख्यः कथितो विबुधैर्बहुव्रीहिः ॥
द्वाभ्यां पदाभ्यां बहुभिः पदैर्या सङ्ख्योभयोः सा पदयोः पदाग्रे ।
यस्याभवत्पूर्वपदे सहश्च दिगन्तराळव्यतिहारलक्ष्मा ॥

द्विपदबहुव्रीहिर्यथा ।

प्राप्ताग्निमेवमिषुमूढरथानथाश्वान् तूणीरमुद्धृतशरं च वहन् जवेन ।
रुद्रोऽपि वीरपुरुषः स पुरो बिभेद देवैश्च दत्तपशुरेव महाबलस्सन् ॥

EXAMPLES.

प्राप्तः अग्निः यं सः = प्राप्ताग्निः ।
ऊढः रथः यैस्ते = ऊढरथाः ।
दत्तः पशुः यस्मै सः = दत्तपशुः ।
उद्धृताः शराः यस्मात्सः = उद्धृतशरः ।
महत् बलं यस्य सः = महाबलः ।
वीराः पुरुषाः यासु ताः = वीरपुरुषाः ।—इत्यादयः ।

बहुपदबहुव्रीहिर्यथा ।

नीलोज्ज्वलवपुः पातु श्रीमत्पीताम्बरो हरिः ।
यस्य प्रसादात् कुब्जाऽभूत् दिव्यसुन्दरविग्रहा ॥

EXAMPLES.

नीलम् उज्ज्वलं वपुः यस्य सः = नीलोज्ज्वलवपुः ।
श्रीमत् पीतम् अम्बरं यस्य सः = श्रीमत्पीताम्बरः ।
दिव्यः सुन्दरः विग्रहः यस्यास्सा = दिव्यसुन्दरविग्रहा ।
—इत्यादयः ।

संख्योभयपदबहुव्रीहिर्यथा ।

काननेऽस्मिन्नहो राजन् द्वित्रैरायासिता जनैः ।
लभ्यन्ते पञ्चषा नागाः इत्यूचुर्बलिनः प्रभुम् ॥

EXAMPLES.

द्वौ वा त्रयो वा = द्वित्राः ।
पञ्च वा षड्वा = पञ्चषाः ।
त्रयो वा चत्वारो वा = त्रिचतुराः ।
—इत्यादयः ।

संख्योत्तरपदबहुव्रीहिर्यथा ।

ब्रह्माणः कति वा रुद्राः वद त्वमिति सङ्ख्यया ।
कुशलश्चेदेकयोक्त्या वदेदुपदशा इति ॥

EXAMPLES.

दशानां समीपे ये सन्ति, ते = उपदशाः । | एकादशानां समीपे ये सन्ति, ते = उपैकादशाः ।
—इत्यादयः ।

सहपूर्वपदबहुव्रीहिर्यथा ।

सकलास्सहसन्तानाः सकला अपि बाडबाः ।
प्रोचुः स्वस्ति महीपाय सहपुत्राय सन्ततम् ॥

EXAMPLES.

कलाभिस्सह वर्तन्त इति = सकलाः ।
सन्तानैस्सह वर्तन्त इति = सहसन्तानाः ।
पुत्रेण सह वर्तत इति = सपुत्रः ।
—इत्यादयः ।

दिगन्तराळलक्षणबहुव्रीहिर्यथा ।

विद्युदुत्तरपूर्वायाममोघा मारुतो यथा ।
यदि दक्षिणपूर्वायां वृष्टिर्नैव भवेत्तदा ॥

EXAMPLES.

उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तराळम्, [सा = उत्तरपूर्वा ।
दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तराळम्, सा = [दक्षिणपूर्वा ।—इत्यादयः ।

व्यतीहारलक्षणबहुव्रीहिर्यथा ।

बाहूबाहवि केषाञ्चिन्मुष्टीमुष्टयद्भुतं तथा ।
केशाकेश्यभवद्युद्धं वानराणाञ्च रक्षसाम् ॥

EXAMPLES.

बाहुभिर्बाहुभिश्च गृहीत्वेदं युद्धं प्रवृत्तं [= बाहूबाहवि ।
मुष्टिभिर्मुष्टिभिश्च प्रहृत्येदं युद्धं प्रवृत्तम् [= मुष्टीमुष्टि ।
केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तम् = केशाकेशि ।
—इत्यादयः ।

अव्ययीभावसमासनिरूपणम् ।

When an indeclinable forms the initial word of a composition and denotes vicinity, case, relations, absence, accordance, repetition etc., it is called Avyayi Bhava Composition.

यस्याभवत्पूर्वपदेऽव्ययस्य नाम्नो विधानाद्विविधश्च लक्ष्म ।
पूर्वः पदार्थोऽपि च यत्र मुख्यः तमव्ययीभावमुदाहरन्ति ॥

अव्ययपूर्वपदाव्ययीभावो यथा ।

भो राजन् प्रत्यहं भूयात् यथाशक्त्यधिबाडबम् ।
भक्तिस्तयाऽस्तु सम्भद्रं निष्पापमुपलोचनम् ॥

EXAMPLES.

अहनि अहनि = प्रत्यहम् ।
शक्तिम् अनतिक्रम्य = यथाशक्ति ।
बाडबेषु अधि = अधिबाडबम् ।
भद्राणां समृद्धिः = सम्भद्रम् ।
पापानाम् अभावः = निष्पापम् ।
लोचनयोः समीपम् = उपलोचनम् ।

नामपूर्वपदाव्ययीभावो यथा ।

स्वस्यापि भोजने यस्य सूपप्रति न युज्यते ।
शाकप्रत्यथवाऽन्येभ्यः कथं दास्यति स प्रभुः ॥

EXAMPLES.

सूपस्य लेशः = सूपप्रति ।
शाकस्य लेशः = शाकप्रति ।—इत्यादयः ।

द्वन्द्वसमासनिरूपणम् ।

When a set of several words ending with case affixes stands in a relation expressible by 'and', the set is optionally made into a compound. This compound is called Dwandwa.

यस्मिन् समासे प्राधान्यमुभयोः स्यात्पदार्थयोः ।
स हि द्वन्द्वश्चतुर्धा स्यात् बुधैरिति विनिश्चितः ॥
इतरेतरयोगाख्यः समाहाराह्वयस्तथा ।
द्वाभ्यां पदाभ्यां बहुभिरुभौ चेति चतुर्विधः ॥

द्विपदेतरेतरयोगद्वन्द्वो यथा ।

ययोर्बलेन समितौ निहतौ कंसरावणौ ।
सूर्याचन्द्रमसोर्वंश्यौ रामकृष्णावहं भजे ॥

EXAMPLES.

कंसश्च रावणश्च = कंसरावणौ ।
सूर्यश्च चन्द्रमाश्च = सूर्याचन्द्रमसौ ।
रामश्च कृष्णश्च = रामकृष्णौ ।
—इत्यादयः ।

बहुपदेतरेतरयोगद्वन्द्वो यथा ।

वापीकूपतटाकानां महतां स्थापनादपि ।
धर्मार्थकाममोक्षाश्च सिद्ध्यन्त्येव न संशयः ॥

EXAMPLES.

वापी च कूपश्च तटाकश्च = वापीकूपतटाकाः ।
धर्मश्च अर्थश्च कामश्च मोक्षश्च = धर्मार्थ-[काममोक्षाः ।
घटश्च पटश्च कुड्यञ्च = घटपटकुड्यानि ।
—इत्यादयः ।

द्विपदसमाहारद्वन्द्वो यथा ।

शीतोष्णं सुखदुःखं वा वहन् यो वर्तते सदा ।
नियम्य वाक्त्वचं सम्यक् स हि योगीति कथ्यते ॥

EXAMPLES.

शीतञ्च उष्णञ्च तयोस्समाहारः = शीतो-[ष्णम् ।
सुखञ्च दुःखञ्च तयोस्समाहारः = सुख-[दुःखम् ।
वाक्च त्वक्च तयोस्समाहारः = वाक्त्वचम् ।
—इत्यादयः ।

बहुपदसमाहारद्वन्द्वो यथा ।

ढकामृदङ्गपटहं यस्य दध्वान मन्दिरे ।
अश्वहस्तिरथं चास्ति भावुकं तस्य भूभृतः ॥

EXAMPLES.

ढका च मृदङ्गश्च पटहश्च तेषां समाहारः [= ढकामृदङ्गपटहम् ।
अश्वश्च हस्ती च रथश्च तेषां समाहारः = [अश्वहस्तिरथम् ।
पाणिश्च पादश्च ग्रीवा च तेषां समाहारः = पाणि-[पादग्रीवम् ।
—इत्यादयः ।

अलुक्समासो यथा ।

Aluksamasa is that in which the case affixes within the compound are not dropped.

कण्ठेकालं स्मरन्नेव जनुषान्धो हृदिस्पृशम् ।
वाचोयुक्तिं वदन् जीवत्यन्तिकादागतं प्रति ॥

EXAMPLES.

कण्ठे कालो यस्य सः = कण्ठेकालः ।
जनुषा अन्धः = जनुषान्धः ।
हृदि स्पृशतीति = हृदिस्पृक् ।
वाचः युक्तिः = वाचोयुक्तिः ।
अन्तिकात् आगतः = अन्तिकादागतः ।
पश्यतः हरतीति = पश्यतोहरः ।—इत्यादयः ।

नित्यसमासो यथा ।

When the second word of a compound is verbal in character and governs the preceding substantive, the resultant form is known as Nitya Samasa.

कुम्भकारस्तन्तुवायो लोहकारक एव च ।
श्रेणयोऽन्येऽपि संस्थाप्याः पार्श्वे ग्रामस्य यत्नतः ॥

EXAMPLES.

कुम्भं करोतीति = कुम्भकारः ।
तन्तुं वयतीति = तन्तुवायः ।
तापिञ्छेन सङ्काशाः = तापिञ्छनिभाः ।
—इत्यादयः ।

गतिसमासो यथा ।

In this class of compounds, the words comprising the compounds are adverbs prefixed to verbal derivatives.

साक्षात्कृत्य हरिं सम्यक् अलङ्कृत्य पुरं प्रभो ।
तिरस्कृत्य रिपून् पाहि पुरस्कृत्य द्विजान् भुवम् ॥

EXAMPLES.

साक्षात् कृत्वा = साक्षात्कृत्य ।
अलं कृत्वा = अलङ्कृत्य ।
तिरः कृत्वा = तिरः कृत्वा or तिरस्कृत्य ।
ऊरी कृत्वा = ऊरीकृत्य ।—इत्यादयः ।

असमर्थसमासो यथा ।

तनुमुद्धूळयन्मर्त्यः शिवभागवतो यदि ।
अरिषड्वर्गतस्तस्य भयं नास्ति कदाचन ॥

EXAMPLES.

भगवति भक्तः = भागवतः, शिवे भागवतः = शिवभागवतः ।
षण्णां वर्गः = षड्वर्गः, अरीणां षड्वर्गः = अरिषड्वर्गः ।
सूर्यं न पश्यन्तीति = असूर्यंपश्याः ।
—इत्यादयः ।

कृदादिवृत्तयः ।

VERBAL DERIVATIVES, ETC.

कृत्तद्धितसनाद्यन्तधातुभ्यश्चैकशेषतः ।
समासाश्चापि विद्वद्भिः कथिताः पञ्च वृत्तयः ॥

कृद्वृत्तिर्यथा ।

Verbal Derivatives.

भक्तानामपि मर्त्यानाममराणामथापि वा ।
सम्पादयति या ज्ञानं तां वाचं प्रणमाम्यहम् ॥

EXAMPLES.

भजन्त इति = भक्ताः ।
म्रियन्त इति = मर्त्याः ।
न म्रियन्त इति = अमराः ।
ज्ञायते अनेन इति = ज्ञानम् ।
उच्यत इति = वाक् ।—इत्यादयः ।

तद्धितवृत्तिर्यथा ।

Nominal Derivatives.

मानुषानादितेयान्वा पीडयन्तो भुवि स्थिताः ।
ये दैतेयास्तान्निहन्तुं जातो दाशरथिस्स्वयम् ॥

EXAMPLES.

मनोरपत्यानि पुमांसः = मानुषाः ।
अदितेः अपत्यानि पुमांसः = आदितेयाः ।
दितेः अपत्यानि पुमांसः = दैतेयाः ।
दशरथस्य अपत्यं पुमान् = दाशरथिः ।
पुलस्त्यस्य गोत्रापत्यं पुमान् = पौलस्त्यः ।
इन्द्रः देवता अस्येति = ऐन्द्रम् ।
पाणिनिना प्रोक्तम् = पाणिनीयम् ।
कर्मणि साधुः = कर्मण्यः ।
अतिथिषु साधुः = आतिथेयः ।
पृथिव्याः ईश्वरः = पार्थिवः ।
पित्रा तुल्यम् = पितृवत् ।

मात्रा तुल्यम् = मातृवत् ।
गोः भावः = गोत्वम् ।
जनानां समूहः = जनता ।
तारकाः सञ्जाताः अस्य = तारकितम् ।
पञ्च अवयवा अस्य = पञ्चतयम् ।
पञ्चानां पूरणः = पञ्चमः ।
बुद्धिः अस्यास्तीति = बुद्धिमान् ।
अयम् एषामतिशयेन आढ्यः = आढ्यतमः ।
अयमनयोरतिशयेन लघुः = लघुतरः ।
कुत्सितः अश्वः = अश्वकः ।
ईषदूनो विद्वान् = विद्वत्कल्पः ।

सनाद्यन्तधातुवृत्तिर्यथा ।

Desideratives, Frequentatives, etc.

यः पास्पर्धीति वा लोकान् देवैर्वैरायते सदा ।
राक्षसस्य विनाशाय तस्य पुत्रीयतु प्रभुः ॥

EXAMPLES.

अतिशयेन स्पर्धते = पास्पर्धीति ।
वैरम् आचरति = वैरायते ।

पुत्रमात्मनः इच्छतु = पुत्रीयतु ।
—इत्यादयः ।

एकशेषवृत्तिर्यथा ;

viz.—the process by which only one of the component nouns is retained to the exclusion of others, the retained one denoting all the nouns combined.

सर्वेषामपि लोकानां पितरौ यौ सनातनौ ।
विदितौ पालनाच्चित्ते तौ शिवौ सततं भजे ॥


EXAMPLES.

माता च पिता च = पितरौ ।
सनातनी च सनातनश्च = सनातनौ ।
विदिता च विदितश्च = विदितौ ।

सा च स च = तौ ।
शिवा च शिवश्च = शिवौ ।

—इत्यादयः

समासवृत्तिस्सर्वेषु समासेषु निरूपिता ।
परार्थस्याभिधानं हि वृत्तिरित्यभिधीयते ॥



CHAPTER IV.

॥ अव्ययप्रकरणम् ॥

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

लिङ्गविभक्तिवचनशून्यानि अव्ययानि; तानि द्वेधा । प्रतिपदोक्तानि लाक्षणिकानि चेति । तत्र सूत्रकृता स्वरादिचादिप्राद्यूर्यादिसाक्षात्प्रभृत्यादिरूपेण स्वतो निपातितानि प्रतिपदोक्तानि । तान्यमरको-शाव्ययवर्गे द्रष्टव्यानि ।

तत्र कानिचिद्विभक्तिप्रतिरूपकाणि यथा ।

EXAMPLES.

वाम् युवामर्थे—गेये केन विनीतौ वाम् ।
अस्ति सत्तायामर्थे—अस्तिमान् धनिकः आ-स्तिकः; परलोकोऽस्तीति ज्ञानवान् ।

अस्मि अहमर्थे—अस्मि वच्मि; अहं वच्मीत्यर्थः ।
आह उवाचेत्यर्थः ।
आस बभूवेत्यर्थः ।

शास्त्रसिद्धानि अव्ययानि लाक्षणिकानि; तानि त्रेधा; अव्ययीभावकृदन्ततद्धितान्तभेदात् ।

अव्ययीभावो यथा ।

EXAMPLES.

उपकुम्भम्, अपदिशं, मध्येसमुद्रम्, शाकप्रति, प्रतिपुरुषम्, आबालम् ।—इत्यादयः ।

अव्ययत्वापादककृत्प्रत्ययाः ।

क्त्वा, तुमुन्, ल्यप्, णमुल् ।—एतदन्तानि अव्ययानि ।

EXAMPLES.

क्त्वाप्रत्ययान्ता यथा ।

Indeclinable Past Participle (without Prepositions.)

ज्ञात्वा, जित्वा, उषित्वा, दत्त्वा, विदित्वा, गत्वा, दृष्ट्वा, भुक्त्वा, बुद्ध्वा, बद्ध्वा, त्यक्त्वा ।

—इत्यादयः ।

तुमुन्नन्ता यथा ।

Infinitive of Purpose.

भवितुम्, यातुम्, कर्तुम्, गन्तुम्, भोक्तुम्, दातुम्, वक्तुम्, जेतुम्, गातुम्, जीवितुम्, श्रोतुम्, ग्रहीतुम्, तरितुम्, चोदयितुम्, पातुम्, रन्तुम्, वीक्षितुम्, मोक्तुम् ।

—इत्यादयः ।

ल्यबन्ता यथा ।

Indeclinable Past Participle (with the Prepositions.)

सन्तर्प्य, अधिगत्य, विहस्य, विहाय, निधाय, प्रयुज्य, परित्यज्य, आदाय, विनीय, अधीत्य, आहूय, आपृच्छ्य, प्रबोध्य, निबध्य, प्रोच्य, प्रदीव्य, निगृह्य, अवमत्य, प्रोष्य ।
—इत्यादयः ।

णमुलन्ता यथा ।

In the sense of repetition **णमुल्** is inserted of which **ण्**, **उ** and **ल्** are dropped and **अम्** is retained.

स्मारंस्मारम्, पायंपायम्, धावंधावम्, कारंकारम्, भोजंभोजम्, ध्यायंध्यायम् ।—इत्यादयः ।

अव्ययत्वापादकतद्धितप्रत्ययाः ।

आम्, वति, तसिल्, त्रल्, ह, अत्, दा, र्हिल्, अधुना, दानीं, द्यस्, उत्, आरि, समसण्, एद्यवि, द्यस्, एद्युस्, द्युस्, थाल्, थमु, अस्ताति, अस्तातिलुक्, असि, अतसुच्, रिल्, रिष्टातिल्, आति, एनप्, आच्, आहि, धा, ध्यमुञ्, धमुञ्, एधाच्, कृत्वसुच्, सुच्, सुज्लुक्, शस्, तसि, च्वि, साति, त्रा, डाच्, एतदन्तान्यव्ययानि ।

EXAMPLES.

आम् यथा ।

नितराम्, नितमाम्, सुतराम्, सुतमाम्, पचतितराम्, पचतितमाम् ।

वतिर्यथा ।

ब्राह्मणवत्, मधुरावत्, चैत्रवत्, शम्भुवत् ।

तसिल्यथा ।

कुतः, यतः, ततः, अतः, इतः, अमुतः ।

त्रल्यथा ।

सर्वत्र, कुत्र, यत्र, तत्र, बहुत्र ।

हान्तौ यथा ।

इह, कुह ।

अदन्तो यथा ।

क ।

दान्ता यथा ।

सर्वदा, एकदा, अन्यदा, कदा, यदा, तदा ।

र्हिलन्ता यथा ।

एतर्हि, कर्हि, तर्हि, यर्हि ।

अधुनान्तो यथा ।

अधुना ।

दानीम् यथा ।

इदानीम्, तदानीम् ।

द्यस् यथा ।

सद्यः, (समानेऽहनि) ।

उद्यथा ।

परुत्, (पूर्ववत्सरे) ।

आरिर्यथा ।

परारि, (पूर्वतरवत्सरे) ।

समसण् यथा ।

ऐषमः, (अस्मिन्वत्सरे) ।

एद्यविर्यथा ।

परेद्यवि, (परस्मिन्नहनि) ।

द्यो यथा ।

अद्य, (अस्मिन्नहनि) ।

एद्युस् यथा ।

पूर्वेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः, अधरेद्युः, अपरेद्युः, उत्तरेद्युः, उभयेद्युः ।

द्युस् यथा ।

उभयद्युः ।

थाल्यथा ।

सर्वथा, यथा, तथा ।

थमुर्यथा ।

इत्थम्, कथम् ।

अस्तातिर्यथा ।

पुरस्तात्, परस्तात्, अधस्तात्, अवस्तात्, अपस्तात्, अवरस्तात् ।

अस्तातिलुग्यथा ।

प्राक्, प्रत्यक्, उदक् ।

असिर्यथा ।

पुरः, अधः, अवः ।

अतसुज्यथा ।

दक्षिणतः, उत्तरतः, परतः, अवरतः ।

रिल्रिष्टातिलौ यथा ।

उपरि, उपरिष्टात् ।

आतिर्यथा ।

पश्चात्, उत्तरात्, अधरात्, दक्षिणात् ।

एनब्यथा ।

उत्तरेण, अधरेण, दक्षिणेन ।

आज्यथा ।

दक्षिणा, उत्तरा ।

आहिर्यथा ।

दक्षिणाहि, उत्तराहि ।

धा यथा ।

एकधा, द्विधा, त्रिधा, चतुर्धा, पञ्चधा, षोढा, सप्तधा, बहुधा ।

ध्यमुञ्यथा ।

ऐकध्यम् ।

धमुञ्यथा ।

द्वैधं, त्रैधं ।

एधाज्यथा ।

द्वेधा, त्रेधा ।

कृत्वसुज्यथा ।

पञ्चकृत्वः, षट्कृत्वः ।

सुज्यथा ।

द्विः, त्रिः, चतुः ।

सुज्लुग्यथा ।

सकृत् ।

शस् यथा ।

बहुशः, अल्पशः, द्विशः, त्रिशः, माषशः, प्रस्थशः ।

तसिर्यथा ।

कृष्णतः, अर्जुनतः, आदितः, अन्ततः, सर्वतः, वर्णतः, पुरतः, मध्यतः, पार्श्वतः, पृष्ठतः ।

च्विर्यथा ।

कृष्णीभवति, ब्रह्मीभवति ।

सातिर्यथा ।

अग्निसात्, विप्रसात् ।

त्रा यथा ।

विप्रत्रा, देवत्रा, मनुष्यत्रा ।

डाज्यथा ।

पटपटाकरोति, भद्राकरोति, प्रियाकरोति, सुखाकरोति ।

इत्यव्ययानि ।

क्तप्रत्ययान्ता यथा ।

Past Passive Participle.

श्रुत, स्नात, अस्त, कृत, भिन्न, कीर्ण, गूढ, वृद्ध, शङ्कित, सोढ, मग्न, सन्न, उदित, पृष्ट, इष्ट, नद्ध, मित, पीत, गीत, दृष्ट, चोदित, सित, उत, हित, हृत, रत, आप्त—इत्यादयः ।

परस्मैपदिनां धातूनां शत्रन्तरूपाणि ।

Present Participle of Parasmaipada Roots.

आप्नुवत्, रुन्धत्, तन्वत्, क्रीणत्, चोरयत्, बोधयत्, पचत्, अदत्, दीव्यत्, हसत् ।—इत्यादयः ।

आत्मनेपदिनां धातूनां शानजन्तरूपाणि ।

Present Participle of Atmanepada Roots.

दीव्यमान, तुदमान, शयान, वर्तमान, एधमान, रममाण, वर्धमान—इत्यादयः ।

CHAPTER V.

तिङन्तप्रकरणम् ।

There are two sets of verbal terminations called Parasmaipada and Atmanepada; some roots take Parasmaipada only, some take Atmanepada only, while others take both.

2. In the case of those roots which take optionally Parasmaipada or Atmanepada terminations, the former set of terminations is added when the result of the actions belongs to any one other than the agent, and the latter set is added when the result of the action accrues to the agent. In the case of those roots which take only one of these two sets of terminations, that set is to be added in any case.

3. Roots are classified under 10 conjugations.

4. These ten conjugations are here divided into two sets: one comprising the 1st, 4th, 6th and the 10th conjugations, and the other the rest. The four conjugations 1st, 4th, 6th and 10th are grouped together as their bases in these conjugations end in अ ।

5. The following are the distinguishing signs of each conjugation :—

शब्विकरणम्	I	अ ।	1st set.
श्यन्विकरणम्	IV	य ।	
शविकरणम्	VI	अ ।	
णिज्विकरणम्	X	अय ।	
लुग्विकरणम्	II	None.	2nd set.
श्लुविकरणम्	III	Reduplication of roots.	
श्नुविकरणम्	V	नु ।	
श्नंविकरणम्	VII	न ।	
उविकरणम्	VIII	उ ।	
श्नाविकरणम्	IX	ना ।	

Every verb has ten tenses and moods in all.

The terminations affixed to the roots falling under the second set mentioned in para 5 above, are divided into two classes—*viz.*, Strong and Weak. When strong terminations are added, the final, or the penultimate short, vowel of the bases takes *Guna*.

The ten tenses and moods are :—

1. लट् = Present.
2. लङ् = Imperfect.
3. लोट् = Imperative.
4. विधिलिङ् = Potential.

These 4 tenses and moods are conjugational (सार्वधातुकरूपाणि), and they are so called because the conjugational signs are added to the roots in these tenses and moods.

5. लिट् = Perfect.
6. लुट् = First Future.
7. ऌट् = Second Future.
8. ऌङ् = Conditional.
9. लुङ् = Aorist.
10. आशीर्लिङ् = Benedictive.

These are non-conjugational tenses आर्धधातुकरूपाणि : these are so called because the conjugational signs are not added to roots in these tenses; the tenth conjugational sign—अय—however, makes its appearance in some of these tenses.

लकारार्थाः प्रोच्यन्ते ।

SIGNIFICATIONS OF TENSES AND MOODS.

1. वर्तमानत्वेऽर्थे धातोः परतः लट् भवेत् ।

The present tense denotes what is taking place.

2. अनद्यतनभूतार्थे विवक्षिते धातोः परतः लङ् भवति ।

The Imperfect tense denotes an action which has taken place before the beginning of this day.

3. विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनाशीरादिष्वर्थेषु विवक्षितेषु, लोट्, विधिलिङ्, आशीर्लिङ् एते त्रयोऽपि स्युः ।

The Imperative denotes command, inquiry, or blessing.

The Potential is used when in a sentence one statement depends on another as its reason or condition. Often, when used in independant clauses, it implies a wish, a hope, a prayer, or a probability.

Benedictive denotes a wish, and more particularly, a blessing.

4. भूतानद्यतनपरोक्षार्थे विवक्षिते धातोः परतः लिट् भवति ।

The perfect is used to denote an action of which the speaker was not a witness and which took place prior to the previous midnight, or to denote an action which took place long ago. It is also used to denote an action which the agent wishes to hide or did in an unconscious moment.

5. अनद्यतनभविष्यदर्थविवक्षायां लुट् भवेत् ।

First future definitely expresses some thing which is to take place at some time in the future.

6. भविष्यत्वमात्रविवक्षायां धातोः परतः लृट् भवति ।

Second future denotes an action which will take place in future in general, and more particularly that which is to take place in the very day.

7. हेतुहेतुमद्भावादिषु अधिकार्थेषु विवक्षितेषु लृङ् सम्भवति ।

The conditional is used when a person speaks of a thing which will not really take place but is merely presumed. It corresponds to the English pluperfect conditional, and must, in Sanskrit, be used in antecedent and consequent clauses.

8. भूतत्वमात्रविवक्षायां लुङ् स्यात् ।

The Aorist is used to denote a past action generally.

9. **अद्यतन** is used to denote the day, beginning from the second half of the preceding night, and ending with the 1st half of the following night.

अनद्यतन is any time in general other than the **अद्यतन** day.

लकारादेशप्रत्ययाः ।

Terminations of the Roots of the FIRST SET in the Conjugational Tenses.

PARASMAIPADA.			ATMANEPADA.		
PRESENT TENSE. लट् ।			PRESENT TENSE. लट् ।		
मि	वः	मः	इ	वहे	महे
सि	थः	थ	से	इथे	ध्वे
ति	तः	अन्ति	ते	इते	अन्ते
IMPERFECT. लङ् ।			IMPERFECT. लङ् ।		
अम्	व	म	इ	वहि	महि
स्	तम्	त	थास्	इथाम्	ध्वम्
त्	ताम्	अन्	त	इताम्	अन्त
IMPERATIVE. लोट् ।			IMPERATIVE. लोट् ।		
आनि	आव	आम	ऐ	आवहै	आमहै
(None)	तम्	त	स्व	इथाम्	ध्वम्
तु	तां	अन्तु	ताम्	इताम्	अन्ताम्
POTENTIAL. विधिलिङ् ।			POTENTIAL. विधिलिङ् ।		
ईयम्	ईव	ईम	ईय	ईवहि	ईमहि
ईस्	ईतम्	ईत	ईथाः	ईयाथाम्	ईध्वम्
ईत्	ईतां	ईयुः	ईत	ईयाताम्	ईरन्

Terminations of the Roots of the SECOND SET in the Conjugational Tenses.

PARASMAIPADA.

The Present tense and Imperfect tense terminations of the roots of the 2nd set are the same as those of the roots of the 1st set.

IMPERATIVE. लोट्।

आनि	आव	आम
हि	तम्	त
तु	ताम्	अन्तु

POTENTIAL. विधिलिङ्।

याम्	याव	याम
यास्	यातम्	यात
यात्	यातां	युः

ATMANEPADA.

PRESENT TENSE. लट्।

ए	वहे	महे
से	आथे	ध्वे
ते	आते	अते

IMPERFECT. लङ्।

इ	वहि	महि
थास्	आथाम्	ध्वम्
त	आताम्	अत

IMPERATIVE. लोट्।

ऐ	आवहै	आमहै
स्व	आथां	ध्वं
ताम्	आताम्	अताम्

The terminations of the Potential of the 2nd set are the same as those of the 1st set.

Terminations of the Roots in the Non-conjugational Tenses.

PARASMAIPADA.

PERFECT. लिट्।

अ	व	म
थ	अथुः	अ
अ	अतुः	उः

FIRST FUTURE. लुट्।

तास्मि	तास्वः	तास्मः
तासि	तास्थः	तास्थ
ता	तारौ	तारः

SECOND FUTURE. लृट्।

स्यामि	स्यावः	स्यामः
स्यसि	स्यथः	स्यथ
स्यति	स्यतः	स्यन्ति

CONDITIONAL. लृङ्।

स्यम्	स्याव	स्याम
स्यः	स्यतम्	स्यत
स्यत्	स्यताम्	स्यन्

BENEDICTIVE. आशीर्लिङ्।

यासम्	यास्व	यास्म
याः	यास्तम्	यास्त
यात्	यास्ताम्	यासुः

Terminations of the Roots in the Non-Conjugational Tenses.

ATMANEPADA.

PERFECT. लिट् ।

ए	वहे	महे
से	आथे	ध्वे
ए	आते	इरे

FIRST FUTURE. लुट् ।

ताहे	तास्वहे	तास्महे
तासे	तासाथे	ताध्वे
ता	तारौ	तारः

SECOND FUTURE. लृट् ।

स्ये	स्यावहे	स्यामहे
स्यसे	स्येथे	स्यध्वे
स्यते	स्येते	स्यन्ते

CONDITIONAL. लृङ् ।

स्ये	स्यावहि	स्यामहि
स्यथाः	स्येथां	स्यध्वं
स्यत	स्येतां	स्यन्त

BENEDICTIVE. आशीर्लिङ् ।

सीय	सीवहि	सीमहि
सीष्ठाः	सीयास्थां	सीध्वं
सीष्ट	सीयास्तां	सीरन्

Terminations of the AORIST.

[Due reference being paid to examples, these are generally the only sets of terminations in both padas.]

PARASMAIPADA.

				EXAMPLES.
I	अम्	व	म	अपाम् ।
	स्	तम्	त	
	त्	ताम्	उः	
II	अम्	आव	आम	अपुषम् ।
	अस्	अतम्	अत	
	अत्	अताम्	अन्	
III	सिषम्	सिष्व	सिष्म	अग्लासिषम्
	सीः	सिष्टम्	सिष्ट	
	सीत्	सिष्टाम्	सिषुः	
IV	सम्	साव	साम	अलिक्षम् ।
	सः	सतम्	सत	
	सत्	सताम्	सन्	
V	सम्	स्व	स्म	अजैषम् ।
	सीः	स्तम्	स्त	
	सीत्	स्ताम्	सुः	
VI	इषम्	इष्व	इष्म	अगादिषम् ।
	ईः	इष्टम्	इष्ट	
	ईत्	इष्टाम्	इषुः	

Terminations of the AORIST.

ATMANEPADA.

VII

			EXAMPLES.
ए	आवहि	आमहि	
अथाः	एथाम्	अध्वम्	अचकमे ।
अत	एताम्	अन्त	

VIII

सि	सावहि	सामहि	
सथाः	साथाम्	सध्वम्	अलिक्षि ।
सत	साताम्	सन्त	

IX

			EXAMPLES.
सि	स्वहि	स्महि	
स्थाः	साथाम्	ध्वम्	अमंसि ।
स्त	साताम्	सत	

X

इषि	इष्वहि	इष्महि	
इष्ठाः	इषाथाम्	इड्ढ्वम्	अशङ्किषि
इष्ट	इषाताम्	इषत	

With reference to Conjugational Tenses, mostly all the notable features about them, both Padas, both Sets, are given below. As regards the points worthy of note about the Non-conjugational Tenses, they are given generally under their respective heads.

प्रथमभागविकरणचतुष्टयानां शब्विकरणे परे विकरणनिमित्तकगुणः पदद्वितयेऽपि धातोरन्त्याचश्च उपधाभूतह्रस्वाचश्च भवति ।

In the first set (under which are comprised the 1st, the 4th, the 6th, and the 10th conjugations), the final or the penultimate short vowel of roots of the 1st conjugation Parasmaipada and Atmanepada, takes *guna*, when they are followed by the Conjugational sign.

Examples:—1st conj. बुध् + अ = बोध् + अ + ति = बोधति, बोधते; नी + अ = ने + अ = नय् + अ = नय + ति = नयति, नयते ।

श्यन्विकरणे परे गुणः न भवति ।

But to the 4th conjugation, the above rule does not apply.

Examples:—4th conj. मुह् + य = मुह्य + ति = मुह्यति; डी + य = डीय + ते = डीयते ।

शविकरणे परे गुणः न भवति ।

Neither does the final or the penultimate short vowel of roots of the 6th conjugation take *guna*, when they are followed by the conjugational sign.

Examples:—6th conj. विश् + अ + ति = विशति । कृ + अ + ति = किरति ।

णिज्विकरणे परे उपधाभूताकारस्य अन्त्यानामचाञ्च वृद्धिर्भवति । उपधाभूतानाम् अकार-भिन्नानां ह्रस्वाचान्तु गुणः भवति ।

In the 10th conjugation, the penultimate **अ,** or the final vowel, of roots takes *Vriddhi,* when they are followed by the conjugational sign **अय.** But penultimate short vowels other than **अ** take *guna* under the same circumstances.

Examples:—10th conj. चुर् + अय = चोर् + अय + ति = चोरयति, चोरयते । तड् + अय = ताड् + अय = ताडय + ति = ताडयति । पॄ + अय = पारय + ति = पारयति ।

द्वितीयभागप्रत्ययेषु परेषु श्नुविकरणे उविकरणे परस्मैपदलट्लङोरेकवचनेषु लोटि प्रथमपुरुषैकवचने उत्तमपुरुषे च विकरणस्थस्य उकारस्य गुणो भवति ।

Of roots of the 5th and 8th conjugations, the **उ** in the conjugational sign takes *guna* when followed by the singulars of the Present and the Imperfect, the third person singular and the first person of the Imperative, all Parasmaipada.

लुग्विकरणश्लुविकरणयोस्तु परस्मैपदप्रत्ययेषु परेषु धातोः अन्त्याचः उपधाभूतह्रस्वाचश्च गुणः भवति ।

In the 2nd and 3rd conjugations, the final or the penultimate short vowel of roots takes *guna*, when followed by the Parasmaipada terminations cited above.

Examples:—5th Conj. चि + नु + ति = चिनोति, चिनोतु, अचिनोत्, चिनवानि, चिनवाव, चिनवाम, चिनुते*;

8th Conj कृ—कर् + उ = करु + ति = करोति, करोतु, अकरोत्, करवाणि, करवाव, करवाम, कुरुते*;

2nd Conj. विद् + ति = वेद् + ति = वेत्ति, वेत्तु, अवेत्, वेदानि, वेदाव, वेदाम;

3rd Conj. भृ + भृ = भभृ + ति = बभृ + ति = बिभृ + ति = बिभर्ति, बिभर्तु, अबिभः, बिभराणि, बिभराव, बिभराम, बिभृते ।

द्वितीयभागात्मनेपदे तु लोडुत्तमपुरुष एव गुणो भवति ।

Before the Imperative first person alone of the Atmanepada terminations of the roots of the 2nd, 3rd, 5th, and 8th conjugations of the 2nd set their **विकरण** takes *guna.*

Examples:—चिनवै, चिनवावहै, चिनवामहै; तनवै, तनवावहै, तनवामहै; बिभरै, बिभरावहै, बिभरामहै; लेहै, लेहावहै, लेहामहै ।

CHAPTER VI.

[*As the radical changes in the Conjugational Tenses are easy, they have not been explained in detail.*]

आर्धधातुकलकाराणाम् इडागमप्रकरणम् ।

AUGMENT इ IN THE NON-CONJUGATIONAL TENSES.

I. आर्धधातुकस्येड्वलादेः । यकारेतरहलाद्यार्धधातुकप्रत्ययानां इडागमः भवति ।

To the non-conjugational terminations, beginning with any consonant except **य**, the augment **इ** is prefixed before they are applied to certain roots.

II. धातवस्तु सेट्का अनिट्का इति द्वेधा विभज्यन्ते । सेट्कधातुभ्यः परेषां प्रत्ययानां इडागमो भवति । अनिट्केभ्यस्तु न भवति । तत्र अजन्तेषु धातुषु, ऊदन्तान् ऋदन्तान् यु, रु, प्रभृतींश्च धातून् वर्जयित्वा अन्ये एकाचः धातवः अनिटः । ऊदृदन्तादयः सर्वेऽप्यनेकाचश्च धातवः सेटः । (सन्नन्तणिजन्तयङन्तादयश्च सेटः भवन्तीति बोध्यम् ।)

Examples:—बभूविम, तरीता, यविष्यति, अरावीत्, अक्ष्णविष्यत्, शिश्रियषे, सुष्णुविव, नुनुविम, चुक्षविथ, शिश्वियिम, डिड्यिषे, श्रयिता, वरिता, वरिष्यति, जजागरिम, चिकीर्षिता, कारयिता, बोभविता ।

तथाह्याहुः—

ऊदृदन्तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्श्रिभिः ।
वृङ्वृञ्भ्याश्च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥

Roots are generally divided into two sets, the *Set* ones and the *Anit* ones. The Augment **इ** is placed before the terminations in the case of *Set* roots, but not in the case of *Anit* roots. Such roots as are of one syllable and end in any vowel except **ऊ** and **ऋ**, the roots **यु, रु** etc. also being excepted, are *Anit* ones, but all roots of more than one syllable are *Set*. (Desideratives, Causals, and Frequentatives etc., are to be regarded as *Set*.)

III. हलन्तेषु धातुषु शक्लपचित्यादिश्लोकपठितान् द्व्यधिकशतं धातून् विना अन्ये हलन्त धातवः सेट्काः । शक्लपच्यादयस्तु अनिटः ।

Of roots ending in consonants the 102 enumerated in the slokas below beginning with **शक्ल, पच्**, are *Anit* and the rest are *Set*.

Examples:—**मोदिता, गदिता,** etc. *Set*; **शक्ता, पक्ता,** etc. *Anit*.

तथाच—

शक्ल्-पच्-मुचि-रिच्-वच्-विच्-सिच्-प्रच्छि-त्यज्-निजिर्-भजः ।
भञ्ज्-भुज्-भ्रस्ज्-मस्जि-यज्-युज्-रुज्-रञ्ज्-विजिर्-स्वञ्जि-सञ्ज्-सृजः ॥
अद्-क्षुद्-खिद्-छिद्-तुदि-नुदः-पद्य-भिद्-विद्यतिर्-विनद् ।
शद्-सदी-स्विद्यतिः-स्कन्दि-हदी-क्रुध्-क्षुधि-बुध्यती ॥
बन्धिर्-युधि-रुधी-राधि-व्यध्-शुधः-साधि-सिध्यती ।
मन्य-हन्न्-आप्-क्षिप्-छुपि-तप्-तिपस्तृप्यति-दृप्यती ॥
लिप्-लुप्-वप्-शप्-स्वप्-सृपि-यभ्-रभ्-लभ्-गम्-नम्-यमो-रमिः ।
क्रुशिर्-दंशि-दिशी-दृश्-मृश्-रिश्-रुश्-लिश्-विश्-स्पृशः-कृषिः ॥
त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-शिष्-शुष्-श्लिष्यतयो-घसिः ।
वसतिर्-दह्-दिहि-दुहो-नह्-मिह्-रुह्-लिह्-वहिस्तथा ॥
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ।

This division of *Set* and *Anit* roots is true only in a general way. The exceptions in each tense will be noted in their proper places.

लिट्प्रकरणम् ।

PERFECT.

I. **परोक्षे लिट्** । भूतानद्यतनपरोक्षार्थे धातोः लिट्स्यात् ।

(For translation, see Chapter V, 'Significations of Tenses and Moods.')

लिट्प्रत्ययाः । Perfect Terminations.

परस्मैपदम् । PARASMAIPADA.			आत्मनेपदम् । ATMANEPADA.		
अ	व	म ।	ए	वहे	महे ।
थ	अथुः	अ ।	से	आथे	ध्वे ।
अ	अतुः	उः ।	ते	आते	इरे ।

II. **एकाचो द्वे प्रथमस्य । अजादेर्द्वितीयस्य । लिटि धातोरनभ्यासस्य ।** लिटि हलादिधातूनां प्रथमौ हलचौ द्वित्वं लभेते । अजादीनान्तु प्रथमः अजेव द्वित्वं लभते ।

In Perfect, in the case of roots beginning with a consonant, the consonant with the following vowel is reduplicated; whereas, with reference to roots beginning with a vowel, the vowel alone is reduplicated.

Examples :—चि, चिचि ; इ, इइ ।

III. पूर्वोऽभ्यासः । द्विरुक्तौ पूर्वभागः अभ्याससंज्ञः स्यात् ।

When a root is reduplicated, the first syllable of the reduplicated form is known as Abhyasa or reduplicative syllable.

IV. शर्पूर्वाः खयः । शकारषकारसकारपूर्वकवर्गप्रथमद्वितीयादीनां धातूनां वर्गप्रथमद्वितीयैरेव सह प्रथमस्याचः द्वित्वं भवति ।

If a root begins with a conjunct consonant, the first member of which is a sibilant and the 2nd a hard letter, the latter is reduplicated.

V. सार्वधातुकार्धधातुकयोः । पुगन्तलघूपधस्य च । धात्वन्त्यानां अकारभिन्नाचां उपधाभूत इकार उकार ऋकाराणाञ्च गुणस्स्यात् गुणभाविषु प्रत्ययेषु ।

The final vowel (अ excepted) and the penultimate इ, उ and ऋ of roots take Guna before terminations, capable of inducing Guna changes.

Examples :—पस्पर्ध, चुश्च्योत, तिष्ठेव ।

VI. ह्रस्वः । अभ्यासस्थस्य अचः ह्रस्वो भवति ।

The vowel in the Abhyasa, if long, is shortened.

VII. अचोञ्णिति । अत उपधायाः । णलुत्तमोवा । परस्मैपदेषु धात्वन्त्यस्य अचः धातूपधाभूतस्य अकारस्य च लिटि प्रथमपुरुषैकवचने वृद्धिर्भवति । उत्तमपुरुषैकवचनेच विकल्पेन ।

In the Perfect Parasmaipada, the Penultimate अ, and the final vowel of roots take Vridhi necessarily in the 3rd person singular, and optionally in the 1st person singular.

Examples :—1st person singular निनाय or निनय; 3rd person singular निनाय ।
do do पपात or पपत; do do पपात ।

VIII. एच इग्घ्रस्वादेशे ।

The short forms for ए, ऐ, ओ and औ are इ and उ ।

Examples :—सेव्, सिषेवे ।

IX. अभ्यासे चर्च । अभ्यासस्थस्य वर्गद्वितीयस्य प्रथमवर्णः चतुर्थस्य तृतीयो वर्णश्च आदेशो भवति ।

A radical hard aspirate in the Abhyasa is changed to the hard unaspirate or the 1st letter of its class; and a radical soft aspirate, to the soft unaspirate.

Examples:—पफाल, बभाण ।

X. कुहोश्चुः । अभ्यासस्थकवर्गस्य चवर्गः हकारस्य जकारश्च आदेशो भवति ।

A letter of the guttural class in the Abhyasa is changed into the corresponding letter of the palatal class, while ह् substitutes ज for itself under the same circumstances.

Examples:—चखान, जगाद, जहार, चकमे, जघास ।

XI. उरत् । अभ्यासस्थऋकारस्य अकारादेशो भवति ।

The letter ऋ in the Abhyasa is changed to अ ।

Example:—चकार ।

XII. भवतेरः । भूधातोः अभ्यासोकारस्य अकारः स्यात् ।

The उ in the Abhyasa of भू is altered to अ ।

XIII. भुवो वुग्लुङ्लिटोः । भूधातोः लुङ्लिटोः अजादौ प्रत्यये परे वकार आसज्यते ।

भू, in the Perfect and the Aorist, when followed by a termination beginning with a vowel, has a व् added on to it.

Examples:—भू + अ, भू भू + अ, भु भू + अ, बु भू + अ, ब भू + अ, बभूव् + अ, बभूव ।

XIV. (*a*) 1. क्रादि (कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, and श्रु) भिन्नेभ्यः सर्वेभ्यः धातुभ्यः परेषां प्रत्ययानां लिटि इडागमः भवति ।

All roots, except कृ, सृ, भृ etc., take the augment इ before the Perfect terminations.

Examples:—बिभ्यिव, बिभ्यिम; पेचिव, पेचिम; निन्यिषे, निन्यिवहे, निन्यिमहे; रेमिषे, रेमिवहे, रेमिमहे ।

2. क्रादीनान्तु इट् न भवति ।

Examples:—चकर्थ, चकृव, चकृम; ससर्थ, ससृव, ससृम; बभर्थ, बभृव, बभृम; वव्रृषे, ववृध्वे; ववृवहे, ववृमहे; तुष्टुषे, तुष्टुढ्वे; तुष्टुवहे, तुष्टुमहे; सुस्रोथ, सुस्रुव, सुस्रुम; दुद्रोथ, दुद्रुव, दुद्रुम; शुश्रोथ, शुश्रुव, शुश्रुम ।

(*b*) ऋकारान्ताः अनिट्काः धातवः लिटि थलि इटं नाप्नुवन्ति ।

Anit roots ending in short ऋ do not admit of the augment इ before the 2nd person singular Parasmaipada termination of the Perfect (थ).

Example:—जहर्थ ।

(*c*) अजन्ता, अकारवन्तो हलन्ता, वा अनिट्का धातवः लिटि थलि विकल्पेन सेट्काः भवन्ति ।

In the case of *Anit* roots, ending in a vowel, or having an अ in them and ending in a consonant, इ is optionally prefixed to थ before it is applied to the root.

Examples :—निनयिथ or निनेथ, जगमिथ or जगन्थ ।

अयन्त्वत्र संग्रहः—

अजन्तोऽकारवान् वा यः तास्यनिट् थलि वेडयम् ।
ऋदन्त ईदृङ्नित्यानिट् क्राद्यन्यो लिटि सेड्भवेत् ॥

XV. (*a*) इणषीध्वंलुङ्लिटां धोऽङ्गात् । विभाषेटः । इकार, उकार, ऋकारान्तेभ्यः धातुभ्यः परस्य अनिटः लिट्स्थानिकध्वेप्रत्ययधकारस्य ढकारः स्यात् ।

After roots ending in इ, उ or ऋ, ध्वे when unaugmented, is changed into ढ्वे ।

Examples :—तुष्टुढ्वे, चकृढ्वे ।

(*b*) य, र, ल, व, ह एभ्यः परस्मात् इटः परः यः ध्वेप्रत्ययः तस्य धकारस्य ढकारः वा स्यात् ।

But this change takes place optionally when the augment इ is preceded by य, र, ल, व or ह ।

Examples :—दिदीयिध्वे or दिदीयिढ्वे, जह्विध्वे or जह्विढ्वे, दिदिविध्वे or दिदिविढ्वे, जगाहिध्वे or जगाहिढ्वे, चेलिध्वे or चेलिढ्वे ।

XVI. स्वरतिसूतिसूयतिधूञूदितो वा । रधादिभ्यश्च । गुप्, त्रप्, सिध्, क्षम्, मृज्, क्लिन्द्, अञ्ज्, स्यन्द्, क्लृप्, गुह्, गाह्, अश्, रध्, नश्, तृप्, दृप्, मुह्, स्निह्, स्वृ, सू, धू, एते विकल्पेन आर्धधातुकस्थलेषु सेटः भवन्ति । स्वृसूधूनान्तु थलोऽन्यत्र इडागमो नित्यं भवति ।

Some roots, a few of which are mentioned above, affix इ optionally before the non-conjugational terminations. But the last three of those that have been enumerated above, take इ necessarily before all perfect terminations except थ.

Examples :—जुगोपिथ or जुगोप्थ, तत्रपिथ or तत्रप्थ, सिषेदिथ or सिषेद्ध, चक्षमिथ or चक्षन्थ, ममार्जिथ or ममार्ष्ठ, चिक्लिन्दिथ or चिक्लिन्त्थ, आनञ्जिथ or आनङ्क्थ, सस्यन्दिथ or सस्यन्त्थ, चकल्पिषे or चकल्प्से, जुगूहिथ or जुगूढ, जगाहिषे or जघाक्षे, आनशिषे or आनक्षे, ररन्दिथ or ररन्थ, नेशिथ or ननंष्ठ, ततर्पिथ or तत्रप्थ, ददर्पिथ or ददर्प्थ, मुमोहिथ or मुमोढ, सिष्णेहिथ or सिष्णेढ, सस्वरिथ or सस्वर्थ, सुषुविध्वे or सुषूध्वे, दुधविथ or दुधोथ ।

XVII. (*a*) **अत एकहल्मध्येऽनादेशादेर्लिटि । थलि च सेटि ।** अविकृताभ्यासस्य धातोः असंयुक्तहल्मध्यस्थस्य अकारस्य एकारः स्यात् अभ्यासश्च लिटि लुप्यते, परस्मैपदप्रथमोत्तमपुरुषैकवचने अनिटं थलं च वर्जयित्वा ।

When, in a root, an अ occurs between two simple consonants, and when in the process of reduplication, the Abhyasa is unaltered, the अ is changed to ए and the Abhyasa also is dropped before all terminations except the singular of the 1st and 3rd person Parasmaipada and unaugmented थल् ।

Examples :— ततान, तेनतुः, तेनुः ; पेचे, पेचिवहे, पेचिमहे ; पपाच–पपच, पपक्थ ।

(*b*) **तॄफलभजत्रपश्च । राधो हिंसायाम् ।** तॄ, फल्, भज्, त्रप्, हिंसार्थकराध् एतेषां धातूनां परस्मैपदप्रथमोत्तमपुरुषैकवचने अनिटं थलं वर्जयित्वा अकारः आकारो वा एकारो भवति ।

तॄ, फल्, भज्, त्रप्, राध् meaning 'to offend' alter their अ or आ to ए before all the Perfect terminations except those of the 1st person and 3rd person singulars Parasmaipada and unaugmented थल् ।

(*c*) **वाजॄभ्रमुत्रसाम् । फणाश्च सप्तानाम् ।** जॄ, भ्रम्, त्रस्, फण्, राज्, भ्राज्, भ्राश्, भ्लाश्, स्यम्, स्वन् एतेषां दशानां धातूनां परस्मैपदप्रथमोत्तमपुरुषैकवचने अनिटं थलं वर्जयित्वा अकारः आकारो वा विकल्पेन एकारो भवति ।

The above mentioned 10 roots change their अ or आ to ए optionally before all terminations except those of the 1st and the 3rd person singular Parasmaipada and unaugmented थल् ।

Examples :— तेरुः, फेलुः, भेजिरे, त्रेपिरे, रेधुः, जेरुः or जजरुः, भ्रेमुः or बभ्रमुः, त्रेसुः or तत्रसुः, फेणुः or पफणुः, रेजुः or रराजुः, भ्रेजिरे or बभ्राजिरे, भ्रेशिरे or बभ्राशिरे, भ्लेशिरे or बभ्लाशिरे, स्येमुः or सस्यमुः, स्वेनुः or सस्वनुः ।

XVIII. **मस्जिनशोर्झलि ।** मस्ज्, नश् अनयोरकारात्परतः नकार उपासज्यते हलादिगुणभाविषु प्रत्ययेषु ॥

मस्ज् and नश्, when followed by a termination, capable of inducing Guna-changes, insert a न् after their अ ।

Examples :— ममज्ञिथ, ममंक्थ, नेशिथ, ननंष्ठ ।

XIX. (*a*) **इजादेश्च गुरुमतोऽनृच्छः । कृञ्चानुप्रयुज्यते लिटि ।** आकार व्यतिरिक्तदीर्घादिभ्यः संयुक्तहल्परक अकार व्यतिरिक्त अजादिभ्यः (अनेकाज्भ्यश्च) धातुभ्यः आम् प्रत्ययस्याल्लिटि आमन्तेभ्यः परत्र कृ, भू, अस्, एतेषां धातूनां लिड्रूपाणि च अनुप्रयुज्यन्ते ।

To roots beginning with any long vowel except आ or with a short vowel (except अ) followed by a conjunct consonant—to such roots and to roots of more than one syllable, the termination आम् is affixed in the perfect and then the perfect forms of कृ, भू and अस् are added (necessarily, of course, after आम्) ।

Examples :—ईशाञ्चक्रे, इन्दाञ्चकार, कथयाञ्चकार, पुत्रीयाञ्चकार, जागराञ्चकार, चिकीर्षाञ्चकार ।

(*b*) **दयायासश्च** । दय्, अय्, आस्, (कास्) एभ्यः आम् नित्यः अनुप्रयोगः पूर्ववत् ।

दय्, अय्, आस्, and कास् do necessarily take the प्रत्यय, आम् । Their perfect forms are then formed by adding the reduplicated perfect forms of कृ, भू and अस् ।

Examples :—दयाञ्चक्रे, अयाञ्चक्रे, आसाञ्चक्रे, चकासाञ्चक्रे ।

(*c*) **उषविदजागृभ्योऽन्यतरस्याम्** । उष्, विद्, जागृ, भी, ह्री, भृ, एभ्यः आम् विकल्पेन भवति ।

उष्, विद्, जागृ, भी, ह्री, भृ, and हु affix आम् optionally. भी, ह्री, भृ, and हु, however, necessarily reduplicate their bases ere आम् and the helping verb are added.

Examples :—ओषांचकार or उवोष, विदांचकार or विवेद, जागराञ्चकार or जजागार ।

(*d*) **भीह्रीभृहुवां श्लुवच्च** । भी, ह्री, भृ, हु एतेषां द्वित्वञ्च भवति । अनुप्रयोगः पूर्ववत् । आमि परे गुणो भवति । (विदस्तु न ।)

Before आम् the final vowel, and the penultimate short one of roots (except विद् in the latter case) take their guna substitute.

Examples :—बिभाय or बिभयाञ्चकार, जिह्राय or जिह्रयाञ्चकार, बभार or बिभराञ्चकार, जुहाव or जुहवांचकार ।

(*e*) **अत आदेः** । अभ्यासादिभूताकारस्य दीर्घः भवति ।

The अ in the beginning of the reduplicative syllable is lengthened.

Example :—आद ।

(*f*) **तस्मान्नुड्द्विहलः** । द्विहलो धातोः दीर्घीभूतादकारात्परतः नकार आसज्यते ।

Roots beginning with अ but ending in conjunct consonants, insert न् after the reduplicative syllable.

Example :—आनर्द ।

सम्प्रसारणप्रकरणम् ।

SAMPRASARANA PRAKARANA.

I. **इग्यणस्सम्प्रसारणम्** । यणः स्थाने प्रयुज्यमानः इक् सम्प्रसारणसंज्ञः स्यात् ।

The letters **इ, उ, ऋ,** and **ऌ,** substituted for **य, व, र** and **ल** respectively, are known as Samprasarana.

II. **वचिस्वपियजादीनाङ्किति । ग्रहिज्यावयिव्यधिवष्टि** (वशिः छान्दसः) **विचतिवृश्चति-पृच्छतिभृज्जतीनां ङिति च । लिड्यभ्यासस्योभयेषाम् । विभाषा श्वेः ।** वच्, स्वप्, यज्, वप्, वह्, वस्, वे, व्ये, ह्वे, वद्, ग्रहि, ज्या, वयि, व्यधि, वष्टि, विचति, वृश्चति, पृच्छति, भृज्जति एतेषां लिटि अभ्यासस्य सम्प्रसारणं स्यात् ।

The Abhyasa of the above mentioned roots takes Samprasarana in the perfect.

वचिस्वपियजादीनाम् एकवचनवर्जलिट्प्रत्यये परस्मैपदाशीर्लिङि, क्तप्रत्यये, क्त्वाप्रत्यये, क्तवतु-प्रत्यये, ल्यप्प्रत्यये च परतः ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनाम्, तत्तद्विकरणे च परतः सम्प्रसारणं स्यात् । विकरणे परतः वयिधातोस्सम्प्रसारणं न भवति । श्विधातोस्तु लिटि सम्प्रसारणं विकल्पेन भवति ।

Before all terminations except those of the Singular of the Perfect and of the Benedictive mood, and before the *prathyayas*, **क्त, क्त्वा, क्तवतु** and **ल्यप्**, the roots **ग्रह्, ज्या** etc. take Samprasarana. The roots **वच्, स्वप्, यज्,** etc. and **ग्रह्, ज्या, वय्, वृश्च्,** when followed by their respective conjugational signs, take the corresponding Samprasarana. **वय्** however when followed by its **विकरण** does not take Samprasarana. **श्वि** takes Samprasarana optionally in the perfect.

III. **सम्प्रसारणाच्च** । सम्प्रसारणात् परः अच् लुप्यते ।

The vowel following a Samprasarana is dropped.

IV. **न सम्प्रसारणे सम्प्रसारणम्** । द्वयोर्यणोर्मध्ये परस्यैव सम्प्रसारणम् ।

If two letters, capable of taking Samprasarana, occur together, the second alone takes its corresponding Samprasarana.

Examples :—इयाज, ईजतुः, ईजुः ; सुष्वाप, सुषुपतुः, सुषुपुः ; उवाच, ऊचतुः, ऊचुः ; उवाप, ऊपतुः, ऊपुः ; उवास, ऊषतुः, ऊषुः ; उवाय, ऊयतुः or ऊवतुः, ऊयुः or ऊवुः ; विव्याय, विव्यतुः, विव्युः ; जुहाव, जुहुवतुः, जुहुवुः ; उवाद,

ऊदतुः, ऊदुः ; शुशाव, or शिश्वाय, शुशुवतुः or शिश्वियतुः, शुशुवुः or शिश्वियुः ; उक्तः, उक्तवान्, उक्त्वा, प्रोच्य, गृह्णाति, जिनाति, विध्यति, विचति, वृश्चति, पृच्छति, भृज्जति ।

The other irregularities in the perfect may be learned from paradigms of roots themselves given in Chapter VII.

लुट्प्रकरणम् ।

FIRST FUTURE.

I. **स्यतासी लृलुटोः । लुटः प्रथमस्य डारौरसः । रि च । सार्वधातुकार्धधातुकयोः । पुगन्तलघूपधस्य च ।** धातूनां लुटि प्रथमपुरुषे ता, तारौ, तारः इति प्रत्ययाः भवन्ति । धातूनाम् अन्त्यभूताः उपान्त्याश्च इकार, उकार, ऋकार, ऌकाराः गुणं लभन्ते । तदुपरि मध्यमपुरुषोत्तमपुरुषयोः अस्धातुरूपाणि तत्तत्पदानुगुण्येन अनुप्रयोज्यानि । इडागमस्तु यथानियमं भवति ।

To roots, in the 3rd person, the terminations **ता, तारौ, तारः** are to be appended, when followed by which terminations, the final vowel or the penultimate short one of the roots (**इ, उ, ऋ, ऌ**) substitutes its guna letter. In the 1st and the 2nd person, the corresponding forms of **अस्**, present tense, are to be added on, after **ता** has been affixed to the roots. The pada of **अस्** is, however, dependent on that of the root. If the root is *Set*, **इ** is to be prefixed to the **तृ** before it is added to the root. If the root is *Anit*, the augment **इ** does not occur; or if the root is optionally *Set*, the augment also occurs optionally.

Examples:—भवितास्मि, मोदितासे ।

II. **तीषसहलुभरुषरिषः । ग्रहोऽलिटि दीर्घः ।** इष्, सह्, लुभ्, रुष्, रिष्, एतद्धातूनाम् इड्विकल्पेन भवति । ग्रह्धातोस्तु लिडितरार्धधातुकस्थले इड्दीर्घो भवति ।

The roots **इष्, सह्, लुभ्, रुष्, रिष्** are optionally *Set* in the 1st Future. In the case of **ग्रह्**, the augment **इ** is lengthened before all non-conjugational terminations except those of the Perfect.

Examples:—एषिता, एष्टा ; सहिता, सोढा ; लोभिता, लोब्धा ; रोषिता, रोष्टा ; रेषिता, रेष्टा ; ग्रहीता ।

III. **वृतो वा ।** ऋकारान्तधातूनां वृधातोश्च लिटम्, आत्मनेपदाशीर्लिङम्, परस्मैपदलुङ्च, वर्जयित्वा इड्विकल्पेन दीर्घः भवति ।

The root वृ, and such roots as end in long ॠ, optionally lengthen the augment इ before all the non-conjugational terminations except those of the Perfect, Benedictive, Atmanepada, and Aorist, Parasmaipada.

Examples:—तरिता, तरीता; वरिता, वरीता ।

IV. **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ।** अनिड्धातोः अन्त्याक्षरात्पूर्वे ऋकारः तत्तद्वर्ग-प्रथमद्वितीयाक्षरादि, गुणवृद्धिग्राहक, प्रत्यये परे सति विकल्पेन रेफो भवति ।

Anit roots with a penultimate ऋ and followed by a Guna— or a Vriddhi—taking termination beginning with a hard consonant, change that ऋ to र optionally.

Examples:— स्प्रष्टा, स्पर्ष्टा ।

V. **सहिवहोरोदवर्णस्य ।** सह् वह् धात्वोः हकारस्थानिकढकारः लुप्यते, पूर्वः अकारः आकारो वा ओकारः भवति ।

सह् and वह् drop the ढ, occurring in the stead of ह, whilst the preceding अ or आ is changed to ओ ।

Examples:—सोढा, वोढा ।

VI. **तासि च क्लृपः ।** क्लृप् धातोः परस्मैपदपक्षे इडागमः न भवति, आत्मनेपदे तु विकल्पेन भवति ।

क्लृप् is optionally Parasmaipada in this tense, and, when it is so, does not admit of the augment इ । Before the Atmanepada terminations, however, the augment इ occurs optionally in the case of this root.

Examples:—कल्प्तासि, कल्पितासे, कल्प्तासे ।

लृट्प्रकरणम् ।

SECOND FUTURE.

I. **स्यतासी लृलुटोः ।** लृटि धातोः विकरणस्थाने स्यः भवति । इडागमस्तु लुट इव भवति । लृट्प्रत्ययात्पूर्वम् उपधाह्रस्वाचः अन्त्याचश्च गुणः भवति ।

स्य is affixed to roots and then the corresponding terminations of the Present tense are added. The augment इ occurs as in the first future. The penultimate short and the final vowels take guna before the terminations.

Examples:—लप्स्ये, भविष्यामि, देक्ष्यामि ।

II. सः स्यार्धधातुके । धात्वन्त्यसकारः तकारो भवति ।

When followed by a non-conjugational termination beginning with स्, the final स् of roots is changed to त् ।

Example :—वत्स्यति ।

III. गमेरिट् परस्मैपदेषु । ऋद्धनोस्स्ये । अनिटोरपि गम्हनोः ऋकारान्तस्य धातोश्च स्यप्रत्ययात्पूर्वम् इडागमो भवति ।

Though गम् and हन् and roots ending in short ऋ are *Anit*, yet they affix इ before स्य ।

Examples :—गमिष्यामि, हनिष्यामि ।

IV. सेऽसिचि कृतचृतछृदतृदनृतः । कृत्, चृत्, छृद्, तृद्, नृत् एतेषां सेटामपि स्यप्रत्ययात्पूर्वम् इडागमः विकल्पेन भवति ।

कृत्, चृत्, छृद्, तृद्, नृत्—though these roots are *Set*, they take the augment इ optionally.

Examples :—कर्तिष्यति or कर्त्स्यति, चर्तिष्यति or चर्त्स्यति, छर्दिष्यति or छर्त्स्यति, तर्दिष्यति or तर्त्स्यति, नर्तिष्यति or नर्त्स्यति ।

V. वृद्भ्यः स्यसनोः । न वृद्भ्यश्चतुर्भ्यः । क्लृप्, वृत्, वृध्, शृध्, स्यन्द् एतेषां लृटि विकल्पेन परस्मैपदं भवति । परस्मैपदप्रत्ययः इटं नाप्नोति ।

क्लृप्, वृत्, वृध्, शृध्, and स्यन्द् are optionally Parasmaipada in this tense, and when so, do not affix the augment इ before स्य ।

Examples :—वर्धिष्यते or वर्त्स्यति, वर्तिष्यते or वर्त्स्यति, शर्धिष्यते or शर्त्स्यति, स्यन्दिष्यते or स्यन्त्स्यति, कल्पिष्यते or कल्प्स्यते or कल्प्स्यति ।

लृङ्प्रकरणम् ।

CONDITIONAL.

I. लुङ्लङ्लृङ्क्ष्वडुदात्तः । आडजादीनाम् । आटश्च । लुङि लङि लृङि च हलादिधातोः पूर्वम् अकार आसज्यते । अजादीनान्तु आकारः आसज्यते । पूर्वस्य आकारस्य उत्तरस्य अचश्च वृद्धिर्भवति ।

In the Aorist, the Imperfect and the Conditional, अ is prefixed to roots beginning with a Consonant; and to roots beginning with a vowel, आ is prefixed which with the following vowel takes the corresponding Vriddhi substitute.

II. लङि प्रत्ययाः धातोः पूर्वत्र अकार, आकारसंयोजनञ्च लङ्वत्, अन्यत्सर्वं लटीव ।

To roots in the Conditional, as in the Imperfect, अ or आ is prefixed and then स्य is appended, after which the terminations of the Imperfect are added. In other respects, the forms are similar to those of the Second Future.

III. **विभाषा लुङ्लृङोः** । इङो गाङ्वा स्यात् लुङ्लृङोः परतः अधिपूर्वकेङ्धातोः लङि लुङि च विकल्पेन गा आदेशः स्यात् ।

इ with **अधि** optionally substitutes **गा** for its **इ** in the Conditional and the Aorist. The **गा** is further changed to **गी** before consonants.

Examples :—**अध्यैष्ये** or **अध्यगीष्ये** ।

आशीर्लिङ्प्रकरणम् ।

BENEDICTIVE MOOD.

परस्मैपदप्रत्ययाः । Parasmaipada Terminations.

यासम्	यास्व	यास्म ।
याः	यास्तम्	यास्त ।
यात्	यास्ताम्	यासुः ।

I. **अकृत्सार्वधातुकयोर्दीर्घः** । धातोः अन्त्यभूतौ इकारोकारौ दीर्घं लभेते ।

इ and **उ** at the end of roots are lengthened.

Examples :—**जीयात्, श्रूयात्** ।

II. **एर्लिङि** । दा, धा, मा, स्था, गै, पा = to drink (1st Conj.), हा = to abandon (3rd Conj.), सो एतेषाम् अन्त्याचः स्थाने एकारो भवति ।

The roots **दा, धा, मा, स्था, गै, पा** = to drink (1st conj.), **हा** = to abandon (3rd Conj.), and **सो**, substitute for their final vowel the letter **ए** ।

Examples :—देयात्, धेयात्, मेयात्, स्थेयात्, गेयात्, पेयात्, हेयात्, सेयात् ।

III. **आदेच उपदेशेऽशिति** । **वान्यस्य संयोगादेः** । धात्वन्त्यानाम् एकार, ऐकार, ओकाराणाम् आकारो भवति । स्थाभिन्नानां संयोगादीनां धातूनामन्त्यभूतस्य आकारस्य विकल्पेन एकारो भवति ।

The letters ए, ऐ and ओ at the end of roots substitute आ for themselves. Roots other than स्था beginning with a conjunct consonant, change their final आ to ए optionally.

Examples:—ग्लायात्-ग्लेयात् ।

IV. अनिदितां हल उपधायाः क्ङिति । मन्थ्, अञ्ज्, शंस्, दंश्, सञ्ज्, रञ्ज्, भञ्ज्, स्कन्द्, ग्रन्थ्, स्तम्भ्, बन्ध्, भ्रंश् इत्यादीनाम् अनुनासिको लुप्यते ।

The Anuswara or the नकार of the roots mentioned above and of some others is dropped.

Examples:—मथ्यात्, अज्यात्, शस्यात्, दश्यात्, सज्यात्, रज्यात्, भज्यात्, स्कद्यात्, ग्रथ्यात्, स्तभ्यात्, बध्यात्, भ्रश्यात् ।

संप्रसारणं लिट्प्रकरणे द्रष्टव्यम्—इज्यात्, उप्यात्, गृह्यात्, पृच्छ्यात् ।

For Samprasarana, *see* under लिट्प्रकरण ।

आत्मनेपदप्रत्ययाः । The Atmanepada Terminations.

षीय	षीवहि	षीमहि ।
षीष्ठाः	षीयास्थाम्	षीध्वम् ।
षीष्ट	षीयास्ताम्	षीरन् ।

एते प्रत्ययाः सेड्भ्यः परे चेत् नित्यम्, वेड्भ्यः परे चेत् विकल्पेन इटं लभन्ते । अनिड्भ्यः परे चेत् न लभन्ते ।

The augment इ is prefixed to these terminations in the case of a *Set* root, necessarily; in the case of an optionally *Set* root, optionally; in the case of an *Anit* root, not at all.

Examples:—एधिषीष्ट, सविषीष्ट, सोषीष्ट, नेषीष्ट ।

V. इणष्षीध्वंलुङ्लिटां धोऽङ्गात् । विभाषेटः । अकारेतराचः परः यः षीध्वंप्रत्ययः तदवयवस्य धकारस्य ढकारः स्यात् ।

The ध् of the termination षीध्वम्, when the latter is preceded by any vowel except अ, is changed to ढ्.

Example:—नेषीढ्वम् ।

इडागमात्परस्य तु विकल्पेन भवति ।

But when the augment **इ** precedes the termination, the change indicated above is optional.

Examples :—**एधिषीढ्वम्** or **एधिषीध्वम् ।**

VI. **लिङ्सिचोरात्मनेपदेषु । वृधातोः ॠकारान्तसंयोगादिधातुभ्यश्च परे लिङ्प्रत्ययाः विकल्पेन इटं लभन्ते ।**

The root **वृ** and roots ending in a long **ॠ** and beginning with a conjunct consonant, affix the augment **इ** optionally before the terminations indicated above.

Examples :—**वरिषीष्ट-वृषीष्ट, स्तरिषीष्ट-स्तृषीष्ट ।**

लुङ्प्रकरणम् ।

THE AORIST.

[लुङ्प्रकरणं संग्रहेण वक्ष्यते । Brief Notes on the Aorist.]

1. **आत्मनेपदपरस्मैपदयोः लुङ्प्रत्ययाः दशधा विभज्यन्ते ।**

The terminations of the Aorist are divided into ten sets as already stated in Chapter V.

प्रथमभागप्रत्ययाः । Terminations of the 1st Set.

अम्	व	म
स्	तम्	त
त्	ताम्	उस्

2. **उस्यपदान्तात् । उसः पूर्वः आकारः लुप्यते ।**

The letter **आ**, preceding **उस्**, is dropped.

Examples :—1st Conj. **स्था** = to stand; अस्थाम्, अस्थाव, अस्थाम ।

Do. **दा (यच्छ्)** = to give; अदाः, अदातम्, अदात ।

Do. **पा (पिब्)** = to drink; अपात्, अपाताम्, अपुः ।

3. **विभाषा घ्राधेट्शाच्छासः । घ्रा, धे, शो, छो, सो एते धातवः प्रथमभागीयान् तृतीयभागीयांश्च प्रत्ययान् लभन्ते । तत्र प्रथमभागे रूपाणि ।**

The above mentioned roots take both the 1st and 3rd set of terminations. The resultant forms, when the terminations of the 1st set are appended, are given below.

Examples :—1st Conj. घ्रा = to smell; अघ्रात्, अघ्राताम्, अघ्रुः ।
Do. धेट् = to drink; अधात्, अधाताम्, अधुः ।
4th Conj. शो = to sharpen; अशात्, अशाताम्, अशुः ।
Do. छो = to cut; अच्छात्, अच्छाताम्, अच्छुः ।
Do. सो = to destroy; असात्, असाताम्, असुः ।

तृतीयभागे तु—अघ्रासीत्, अधासीत्, अशासीत्, अच्छासीत्, असासीत् ।

धेधातुः द्वितीयभागप्रत्ययानपि लभते ।

धे takes the 2nd set of terminations also.

Examples :—अदधत्, अदधताम्, अदधन् ।

द्वितियभागप्रत्ययाः । Terminations of the 2nd Set.

अम्	आव	आम
अस्	अतम्	अत
अत्	अताम्	अन्

The changes which some roots undergo before the Aorist terminations are given in circular brackets by the side of those roots.

Examples :—5th Conj. आप् = to obtain; आपम्, आपाव, आपाम; आपः, आपतम्, आपत; आपत्, आपताम्, आपन् ।
4th Conj. अस् (अस्थ्) = to throw; आस्थम्, आस्थाव, आस्थाम ।
1st Conj. गम् = to go; अगमम्, अगमाव, अगमाम ।
4th Conj. तुष् = to be pleased; अतुषम्, अतुषाव, अतुषाम ।
Do. पुष् = to nourish; अपुषम्, अपुषाव, अपुषाम ।
1st Conj. पत् (पप्त्) = to fall; अपप्तम्, अपप्ताव, अपप्ताम ।
2nd Conj. शास् (शिष्) = to rule; अशिषम्, अशिषाव, अशिषाम ।
Do. वच् (वोच्) = to speak; अवोचम्, अवोचाव, अवोचाम ।
5th Conj. शक् = to be able; अशकम्, अशकाव, अशकाम ।
6th Conj. मुच् = to leave; अमुचम्, अमुचाव, अमुचाम, (also 7th set.)

1st Conj. सद् = to perish; असदम्, असदाव, असदाम ।
6th Conj. सिच् = to sprinkle; असिचम्, असिचाव, असिचाम, (also 7th set)
4th Conj. भ्रम् = to wander; अभ्रमम्, अभ्रमाव, अभ्रमाम ।
Do. शम् = to be calm; अशमम्, अशमाव, अशमाम ।
7th Conj. पिष् = to grind; अपिषम्, अपिषाव, अपिषाम ।
4th Conj. मुह् = to be foolish; अमुहम्, अमुहाव, अमुहाम ।
1st Conj. ह्वे (ह्व्) = to call; अह्वम्, अह्वाव, अह्वाम ।
2nd Conj. ख्या (ख्य्) = to tell; अख्यम्, अख्याव, अख्याम ।
4th Conj. नश् = to perish; अनशम्, अनशाव, अनशाम ।
Do. श्लिष् = to join; अश्लिषम्, अश्लिषाव, अश्लिषाम ।
Do. हृष् = to be glad; अहृषम्, अहृषाव, अहृषाम ।
Do. शुष् = to dry; अशुषम्, अशुषाव, अशुषाम ।
Do. क्षुभ् = to be agitated; अक्षुभम्, अक्षुभाव, अक्षुभाम ।
Do. शुध् = to be pure; अशुधम्, अशुधाव, अशुधाम ।

1. **ऋदृशोऽङि गुणः ।** ऋकारान्तानां दृशेश्च ऋकारः गुणं लभते ।

The ऋ (short or long) of roots ending in ऋ and the ऋ of दृश् take Guna.

Examples :—3rd Conj. ऋ = to go; आरत्, आरताम्, आरन् ।
4th Conj. जॄ = to become old; अजरत्, अजरताम्, अजरन् ।
1st Conj. दृश् = to see; अदर्शत्, अदर्शताम्, अदर्शन् ।

दृश्धातुः पञ्चमभागप्रत्ययानपि लभते ।

दृश् takes the 5th set terminations also.

Examples :—अद्राक्षम्, अद्राक्ष्व, अद्राक्ष्म; अद्राक्षीः, अद्राष्टम्, अद्राष्ट; अद्राक्षीत्, अद्राष्टाम्, अद्राक्षुः ।

2. **लुङ्सनोर्घस्लृ ।** अदधातोः लुङि सनि च घस्लृ आदेशस्स्यात् ।

अद् is changed to घस् in the Aorist and the Desiderative.

Examples :—अघसत्, अघसताम्, अघसन् ।

तृतीयभागप्रत्ययाः । Terminations of the 3rd Set.

सिषम्	सिष्व	सिष्म
सीः	सिष्टम्	सिष्ट
सीत्	सिष्टाम्	सिषुः

1 **यमरमनमातां सक्च ।** यम्, रम्, नम्, आकारान्ताश्च धातवः तृतीयभागप्रत्ययान् लभन्ते ।
यम्, रम्, नम् and roots ending with **आ** take the 3rd set of terminations.

Examples :—1st Conj. **ग्लै** = to be weary; अग्लासिषम्, अग्लासिष्व, अग्लासिष्म ।
2nd Conj. **या** = to go; अयासिषम्, अयासिष्व, अयासिष्म ।
Do. **पा** = to protect; अपासिषम्, अपासिष्व, अपासिष्म ।
1st Conj. **रम्** with **वि** = to cease; व्यरंसिषम्, व्यरंसिष्व, व्यरंसिष्म ।
2nd Conj. **भा** = to shine; अभासिषम्, अभासिष्व, अभासिष्म ।
1st Conj. **नम्** = to bow; अनंसिषम्, अनंसिष्व, अनंसिष्म ।
Do. **ध्मा** = to blow; अध्मासिषम्, अध्मासिष्व, अध्मासिष्म ।
2nd Conj. **दो** = to cut; अदासिषम्, अदासिष्व, अदासिष्म ।
Do. **स्ना** = to bathe; अस्नासिषम्, अस्नासिष्व, अस्नासिष्म ।
Do. **मा** = to measure; अमासिषम्, अमासिष्व, अमासिष्म ।

चतुर्थभागप्रत्ययाः । Terminations of the 4th Set.

सम्	साव	साम
सः	सतम्	सत
सत्	सताम्	सन्

1. **शल इगुपधादनिटः क्सः ।** श्, ष्, स्, ह् एतदन्तानाम् इकार, उकार, ऋकारोपधानाम् अनिटां दृशभिन्नधातूनाम् एते प्रत्ययाः भवन्ति । स्पृश्, मृश्, एतेषान्तु पञ्चमभागप्रत्यया अपि भवन्ति। दुह्, दिह्, लिह्, गुह्, द्विष् एतेषाम् अष्टमभागप्रत्यया अपि भवन्ति ।

Anit roots with a penultimate **इ**, **उ** or **ऋ** and a final **श्**, **ष्**, **स्** or **ह्** (being **दृश्** an exception), take this set of terminations. The roots **स्पृश्** and **मृश्** take also the fifth set of terminations. **दुह्**, **दिह्**, **लिह्**, **गुह्**, **द्विष्**—these roots take also the 8th set of terminations.

Examples :—4th Conj. **श्लिष्** = to embrace; अश्लिक्षत्, अश्लिक्षताम्, अश्लिक्षन् ।
6th Conj. **विश्** = to enter; अविक्षत्, अविक्षताम्, अविक्षन् ।
Do. **स्पृश्** = to touch; अस्पृक्षत्, अस्पृक्षताम्, अस्पृक्षन्, (also 5th set.) अस्प्राक्षीत्, अस्प्राष्टाम्, अस्प्राक्षुः; or अस्पार्क्षीत्, अस्पार्ष्टाम्, अस्पार्क्षुः ।
Do. **कृष्** = to plough; अकृक्षम्, अकृक्षाव, अकृक्षाम; (also 5th set.) अक्राक्षीत्, अक्राष्टाम्, अक्राक्षुः; or अकार्क्षीत्, अकार्ष्टाम्, अकार्क्षुः ।

2. लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । दुह्, दिह्, लिह्, गुह्, एतेषां कचित्प्रत्यये रूपद्वयं । दुह्, दिह्, लिह्, and गुह् have two forms before certain terminations.

Examples :—2nd Conj. दुह् = to milk; अधुक्षम्, अधुक्षाव, अधुक्षाम; अधुक्षि, अधुक्षावहि—अदुह्वहि, अधुक्षामहि; अदुग्धाः—अधुक्षथाः, अधुक्षाथाम्, अधुक्षध्वम्—अदुग्ध्वम्; अदुग्ध—अधुक्षत, अधुक्षाताम्, अधुक्षन्त।

Do. दिह् = to increase; अधिक्षम्, अधिक्षाव, अधिक्षाम; अधिक्षि, अधिक्षावहि—अदिह्वहि, अधिक्षामहि; अदिग्धाः—अधिक्षथाः, अधिक्षाथाम्, अधिक्षध्वम्—अदिग्ध्वम्; अदिग्ध—अधिक्षत, अधिक्षाताम्, अधिक्षन्त ।

Do. लिह् = to lick; अलिक्षम्, अलिक्षाव, अलिक्षाम; अलिक्षि, अलिक्षावहि—अलिह्वहि, अलिक्षामहि; अलिक्षथाः—अलीढाः, अलिक्षाथाम्, अलिक्षध्वम्—अलीढ्वम्; अलीढ—अलिक्षत, अलिक्षाताम्, अलिक्षन्त ।

1st Conj. गुह् = to conceal; अगूहिषम्—अघुक्षम्, अगूहिष्व—अघुक्षाव, अगूहिष्म—अघुक्षाम; अघुक्षि, अघुक्षावहि—अगुह्वहि, अघुक्षामहि; अगूढाः—अघुक्षथाः, अघुक्षाथाम्, अघुक्षध्वम्—अगूढ्वम्; अगूढ—अघुक्षत, अघुक्षाताम्, अघुक्षन्त ।

पञ्चमभागप्रत्ययाः । Terminations of the 5th Set.

सम्	स्व	स्म
सीः	स्तम्	स्त
सीत्	स्ताम्	सुः

1. सिचि वृद्धिः परस्मैपदेषु । अस्मिन् भागे धातोः अकारभिन्नाचः वृद्धिं लभन्ते ।

Before these terminations, the vowels of root, except अ, take their Vriddhi substitute.

Example :—अभैत्सीत् ।

2. व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । छकारान्तानां शकारान्तानां व्रश्चादीनाञ्च धातूनां यवरलानुनासिकभिन्नहलादिप्रत्यये परे षकारः अन्तादेशस्स्यात् ।

The roots ending in छ् or श् and the roots व्रश्च् etc., change their finals to ष् when a termination is added beginning with any consonant other than a nasal or semi-vowel.

3. **षढोः कस्सि । षस्य ढस्य च कस्स्यात् सकारे परे ।**

ष् and ढ्, when followed by स्, are changed to क् ।

4. **इण्कोः । आदेशप्रत्यययोः ।** इकाराप्रभृतिभ्यः अज्भ्यः रेफात् कवर्गाच्च परस्य प्रत्ययावयवस्य सकारस्य षकारस्स्यात् ।

The स् in the beginning of a termination, when preceded by any vowel other than अ or आ or by र् or by any letter of the guttural class, is changed to ष् ।

लिट्प्रकरणोक्त 'स्वरतिसूति' इति (XVI) सूत्रम् अत्र ऊह्यम् ।

Examples :— 6th Conj. **मस्ज्** = to be immersed in ; **अमाङ्क्षीत्, अमाङ्क्ताम्, अमाङ्क्षुः** ।

Do. **स्पृश्** = to touch ; **अस्प्राक्षीत्** or **अस्पार्क्षीत्**; (optionally taking guna.) (Also takes 4th Set.) **अस्पृक्षत्** ।

Do. **प्रच्छ्** = to ask ; अ + प्रच्छ् + सीत् ; अ + प्राच्छ् + सीत् ; अ + प्राष् + सीत् ; अ + प्राक् + सीत् ; अ + प्राक् + षीत् ; **अप्राक्षीत्, अप्राष्टाम्, अप्राक्षुः** ।

Do. **सृज्** = to create ; **अस्राक्षम्, अस्राक्ष्व, अस्राक्ष्म ; अस्राक्षीः, अस्राष्टम्, अस्राष्ट ; अस्राक्षीत्, अस्राष्टाम्, अस्राक्षुः** ।

7th Conj. **रुध्** = to prevent ; **अरौत्सम्, अरौत्स्व, अरौत्स्म ; अरौत्सीः, अरौत्तम्, अरौत्त ; अरौत्सीत्, अरौत्ताम्, अरौत्सुः** ।

1st Conj. **वह्** = to bear ; **अवाक्षीत्, अवोढाम्, अवाक्षुः** ।

Do. **वस्** = to dwell ; **अवात्सीत्, अवात्ताम्, अवात्सुः** ।

Do. **दह्** = to burn ; **अधाक्षीत्, अदाग्धाम्, अधाक्षुः** ।

Do. **त्यज्** = to abandon ; **अत्याक्षीत्, अत्याक्ताम्, अत्याक्षुः** ।

4th Conj. **तृप्** = to be satisfied ; **अत्राप्सीत्** or **अताप्र्सीत्** ; (also 6th set.) **अतर्पीत्** ; (also 2nd set.) **अतृपत्** ।

षष्ठभागप्रत्ययाः । Terminations of the 6th Set.

इषम्	इष्व	इष्म
ईः	इष्टम्	इष्ट
ईत्	इष्टाम्	इषुः

1. **वदव्रजहलन्तस्याचः । सिचि वृद्धिः परस्मैपदेषु ।** अत्रापि धातोः अचः वृद्धिर्भवति ।

Here also, the vowels of roots take Vriddhi.

Examples :—1st Conj. वद् = to speak; अवादिषम्, अवादिष्व, अवादिष्म ।
Do. चर् = to walk; अचारिषम्, अचारिष्व, अचारिष्म ।
9th Conj. लू = to cut; अलाविषम्, अलाविष्व, अलाविष्म ।

2. **अतो हलादेर्लघोः ।** अस्मिन् भागे हलादीनां धातूनां अकारस्य दीर्घो वा स्यात् ।

Before these terminations, the अ of roots beginning with a consonant is optionally lengthened.

Examples :—1st Conj. खद् = to be firm; अखादिषम्—अखदिषम्, अखादिष्व—अखदिष्व, अखादिष्म—अखदिष्म ।
Do. गद् = to speak; अगादिषम्—अगदिषम्, अगादिष्व—अगदिष्व, अगादिष्म—अगदिष्म ।
Do. पठ् = to read; अपाठिषम्—अपठिषम्, अपाठिष्व—अपठिष्व, अपाठिष्म—अपठिष्म ।
Do. नद् = to sound; अनादिषम्—अनदिषम्, अनादिष्व—अनदिष्व, अनादिष्म—अनदिष्म ।

अस्य अपवादः ।— Exception.—

3. **ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ।** हकारमकारयकारान्तानाम् सेटां क्षण, श्वस, जागृ, श्वि, लग्, हस्, एतेषाञ्च धातूनामकारस्य न वृद्धिः ।

But *Set* roots with a final ह्, म् or य् and the roots क्षण् etc., do not lengthen their अ before these terminations.

Examples :—1st Conj. मह् = to worship; अमहिषम्, अमहिष्व, अमहिष्म ।
Do. रह् = to leave; अरहिषम्, अरहिष्व, अरहिष्म ।
4th Conj. क्रम् = to transgress; अक्रमिषम्, अक्रमिष्व, अक्रमिष्म ।
1st Conj. व्यय् = to go; अव्ययिषम्, अव्ययिष्व, अव्ययिष्म ।
8th Conj. क्षण् = to kill; अक्षणिषम्, अक्षणिष्व, अक्षणिष्म ।
2nd Conj. श्वस् = to breathe; अश्वसिषम्, अश्वसिष्व, अश्वसिष्म ।
Do. जागृ = to be awake; अजागरिषम्, अजागरिष्व, अजागरिष्म ।
1st Conj. श्वि = to increase; अश्वयिषम्, अश्वयिष्व, अश्वयिष्म ।
Do. लगे = to touch; अलगिषम्, अलगिष्व, अलगिष्म ।
Do. हसे = to smile; अहसिषम्, अहसिष्व, अहसिष्म ।

4. उपधाभूतानाम् इकार, उकार, ऋकाराणां गुणः भवति ।

Penultimate इ, उ and ऋ of roots take Guna.

Examples :—1st Conj. सिध् = to go ; असेधिषम्, असेधिष्व, असेधिष्म ।

Do. शुच् = to be sorry ; अशोचिषम्, अशोचिष्व, अशोचिष्म ।

7th Conj. कृत् = to cut ; अकर्तिषम्, अकर्तिष्व, अकर्तिष्म ।

सप्तमभागप्रत्ययाः । Terminations of the 7th Set.

ए	आवहि	आमहि
अथाः	एथाम्	अध्वम्
अत	एताम्	अन्त

Examples :—2nd Conj. वच् (वोच्) = to speak ; अवोचे, अवोचावहि, अवोचामहि ।

6th Conj. लिप् = to smear ; अलिपे, अलिपावहि, अलिपामहि ।

Do. मुच् = to release ; अमुचे, अमुचावहि, अमुचामहि ।

Do. सिच् = to sprinkle ; असिचे, असिचावहि, असिचामहि ।

अष्टमभागप्रत्ययाः । Terminations of the 8th Set.

सि	सावहि	सामहि
सथाः	साथाम्	सध्वम्
सत	साताम्	सन्त

चतुर्थभागप्रथमसूत्रोक्तानाम् आत्मनेपदधातूनाम् एते प्रत्ययाः भवन्ति ।

The Atmanepada roots mentioned in the first *sutra* dealing with the 4th set of terminations also take this set of terminations.

चतुर्थभागद्वितीयसूत्रं चात्रानुसन्धेयम् ।

Here the 2nd *sutra* under the 4th set is also applicable.

Examples :— 2nd Conj. दुह् = to milk ; अधुक्षि, अधुक्षावहि—अदुह्वहि, अधुक्षामहि ।

एवमेव दिह्, लिह् इत्यादीनां च रूपाणि द्रष्टव्यानि ।

So also the Aorist forms of दिह्, लिह्, etc. are to be formed.

नवमभागप्रत्ययाः । Terminations of the 9th set.

सि	स्वहि	स्महि
स्थाः	साथाम्	ध्वम्
स्त	साताम्	सत

1. **सार्वधातुकार्धधातुकयोः** । धात्वन्त्यौ इकारोकारौ एषु प्रत्ययेषु परेषु गुणं लभेते ।

The final इ and उ of roots substitute their corresponding *guna* letters before these terminations.

Examples:—1st Conj. **रम्** = to sport; अरंसि, अरंस्वहि, अरंस्महि; अरंस्थाः, अरंसाथाम्, अरंध्वम्; अरंस्त, अरंसाताम्, अरंसत ।

Do. **नी** = to lead; अनेषि, अनेष्वहि, अनेष्महि; अनेष्ठाः, अनेषाथाम्, अनेढ्वम्; अनेष्ट, अनेषाताम्, अनेषत ।

4th Conj. **मन्** = to think; अमंसि, अमंस्वहि, अमंस्महि; अमंस्थाः, अमंसाथाम्, अमंध्वम्; अमंस्त, अमंसाताम्, अमंसत ।

7th Conj. **भिद्** = to split; अभित्सि, अभित्स्वहि, अभित्स्महि; अभित्थाः, अभित्साथाम्, अभिद्ध्वम्; अभित्त, अभित्साताम्, अभित्सत ।

2. **ह्रस्वादङ्गात्** । ह्रस्वादचः प्रथममध्यमपुरुषैकवचनसकारौ लुप्येते ।

The स् of these terminations, when preceded by a short vowel, is dropped in the 2nd and the 3rd person singulars.

Examples:—3rd Conj. **भृ** = to fill; अभृषि, अभृष्वहि, अभृष्महि; अभृथाः, अभृषाथाम्, अभृढ्वम्; अभृत, अभृषाताम्, अभृषत् ।

8th Conj. **कृ** = to do; अकृषि, अकृष्वहि, अकृष्महि; अकृथाः, अकृषाथाम्, अकृढ्वम्; अकृत, अकृषाताम्, अकृषत ।

3. **स्थाघ्वोरिच्च** । स्था, दा, धा, एतेषाम् आकारः अस्मिन् भागे इकारं लभते ।

The final आ of स्था, दा and धा, is changed to इ before these terminations.

Examples:—1st Conj. **स्था (सम्)** = to stand; समस्थिषि, समस्थिष्वहि, समस्थिष्महि; समस्थिथाः, समस्थिषाथाम्, समस्थिध्वम्; समस्थित, समस्थिषाताम्, समस्थिषत ।

3rd Conj. **दा** = to give; अदिषि, अदिष्वहि, अदिष्महि ।

Do. **धा** = to put; अधिषि, अधिष्वहि, अधिष्महि ।

दशमभागप्रत्ययाः । Terminations of the 10th Set.

इषि	इष्वहि	इष्महि
इष्ठाः	इषाथाम्	इड्ढ्वम्
इष्ट	इषाताम्	इषत

1. सार्वधातुकार्धधातुकयोः । पुगन्तलघूपधस्य च । एषु प्रत्ययेषु धात्वन्त्यः अच्, उपधाभूतः ह्रस्वश्च गुणं लभते ।

Before these terminations, the final, or the penultimate short, vowel of roots substitutes its corresponding *guna* letter.

Examples :—9th Conj. पू = to purify; अपविषि, अपविष्वहि, अपविष्महि; अपविष्ठाः अपविषाथाम्, अपविढ्वम्; अपविष्ट, अपविषाताम्, अपविषत ।

1st Conj. गर्ह् = to decry, censure; अगर्हिषि, अगर्हिष्वहि, अगर्हिष्महि ।

9th Conj. ग्रह् = to take; अग्रहीषि, अग्रहीष्वहि, अग्रहीष्महि ।

1st Conj. एध् = to increase; ऐधिषि, ऐधिष्वहि, ऐधिष्महि ।

9th Conj. लू = to cut; अलविषि, अलविष्वहि, अलविष्महि ।

Aware, as I am, that, under the ten sets of terminations given above, more numerous changes occur than have been noted above, yet, to avoid all semblance of cumbrousness, and to render this part of grammar, as far as lay in my power, concise and intelligible, I have been moved considerably to cut down and present in as brief a form as was possible, a much difficult and not easily comprehensible part of grammar.

CHAPTER VII.

I. शब्विकरणधातुरूपाणि ।

CONJUGATION OF ROOTS OF THE FIRST CONJUGATION.

दृश् (पश्य्) = to see, Parasmaipada.

सार्वधातुकरूपाणि ।
Conjugational Tenses.

PRESENT. लट् ।

पश्यामि	पश्यावः	पश्यामः
पश्यसि	पश्यथः	पश्यथ
पश्यति	पश्यतः	पश्यन्ति

IMPERFECT. लङ् ।

अपश्यम्	अपश्याव	अपश्याम
अपश्यः	अपश्यतम्	अपश्यतम
अपश्यत्	अपश्यताम्	अपश्यन्

IMPERATIVE. लोट् ।

पश्यानि	पश्याव	पश्याम
पश्य	पश्यतम्	पश्यत
पश्यतु	पश्यताम्	पश्यन्तु

POTENTIAL. विधिलिङ् ।

पश्येयम्	पश्येव	पश्येम
पश्येः	पश्येतम्	पश्येत
पश्येत्	पश्येताम्	पश्येयुः

आर्धधातुकरूपाणि ।
Non-Conjugational Tenses.

PERFECT. लिट् ।

ददर्श	ददृशिव	ददृशिम
ददर्शिथ—दद्रष्ठ	ददृशथुः	ददृश
ददर्श	ददृशतुः	ददृशुः

Non-Conjugational Tenses.—*(Continued.)*

FIRST FUTURE. लुट् ।

द्रष्टास्मि	द्रष्टास्वः	द्रष्टास्मः
द्रष्टासि	द्रष्टास्थः	द्रष्टास्थ
द्रष्टा	द्रष्टारौ	द्रष्टारः

SECOND FUTURE. लृट् ।

द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः
द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ
द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति

CONDITIONAL. लृङ् ।

अद्रक्ष्यम्	अद्रक्ष्याव	अद्रक्ष्याम
अद्रक्ष्यः	अद्रक्ष्यतम्	अद्रक्ष्यत
अद्रक्ष्यत्	अद्रक्ष्यताम्	अद्रक्ष्यन्

BENEDICTIVE. आशीर्लिङ् ।

दृश्यासम्	दृश्यास्व	दृश्यास्म
दृश्याः	दृश्यास्तम्	दृश्यास्त
दृश्यात्	दृश्यास्ताम्	दृश्यासुः

AORIST. लुङ् ।

अद्राक्षम् अदर्शम्	अद्राक्ष्व अदर्शाव	अद्राक्ष्म अदर्शाम
अद्राक्षीः अदर्शः	अद्राष्टम् अदर्शतम्	अद्राष्ट अदर्शत
अद्राक्षीत् अदर्शत्	अद्राष्टाम् अदर्शताम्	अद्राक्षुः अदर्शन्

दा (यच्छ्) = to give, Parasmaipada.

सार्वधातुकरूपाणि ।

Conjugational Tenses.

PRESENT. लट् ।

यच्छामि	यच्छावः	यच्छामः
यच्छसि	यच्छथः	यच्छथ
यच्छति	यच्छतः	यच्छन्ति

IMPERFECT. लङ् ।

अयच्छम्	अयच्छाव	अयच्छाम
अयच्छः	अयच्छतम्	अयच्छत
अयच्छत्	अयच्छताम्	अयच्छन्

IMPERATIVE. लोट् ।

यच्छानि	यच्छाव	यच्छाम
यच्छ	यच्छतम्	यच्छत
यच्छतु	यच्छताम्	यच्छन्तु

POTENTIAL. विधिलिङ् ।

यच्छेयम्	यच्छेव	यच्छेम
यच्छेः	यच्छेतम्	यच्छेत
यच्छेत्	यच्छेताम्	यच्छेयुः

आर्धधातुकरूपाणि ।

Non-Conjugational Tenses.

PERFECT. लिट् ।

ददौ	ददिव	ददिम
ददिथ–ददाथ	ददथुः	दद
ददौ	ददतुः	ददुः

Non-Conjugational Tenses.--(*Continued.*)

FIRST FUTURE. लुट् ।

दातास्मि	दातास्वः	दातास्मः
दातासि	दातास्थः	दातास्थ
दाता	दातारौ	दातारः

SECOND FUTURE. लृट् ।

दास्यामि	दास्यावः	दास्यामः
दास्यसि	दास्यथः	दास्यथ
दास्यति	दास्यतः	दास्यन्ति

CONDITIONAL. लृङ् ।

अदास्यम्	अदास्याव	अदास्याम
अदास्यः	अदास्यतम्	अदास्यत
अदास्यत्	अदास्यताम्	अदास्यन्

BENEDICTIVE. आशीर्लिङ् ।

देयासम्	देयास्व	देयास्म
देयाः	देयास्तम्	देयास्त
देयात्	देयास्ताम्	देयासुः

AORIST. लुङ् ।

अदाम्	अदाव	अदाम
अदाः	अदातम्	अदात
अदात्	अदाताम्	अदुः

गम् (गच्छ्) = to go, Parasmaipada.

सार्वधातुकरूपाणि ।

Conjugational Tenses.

PRESENT. लट् ।

गच्छामि	गच्छावः	गच्छामः
गच्छसि	गच्छथः	गच्छथ
गच्छति	गच्छतः	गच्छन्ति

IMPERFECT. लङ् ।

अगच्छम्	अगच्छाव	अगच्छाम
अगच्छः	अगच्छतम्	अगच्छत
अगच्छत्	अगच्छताम्	अगच्छन्

IMPERATIVE. लोट् ।

गच्छानि	गच्छाव	गच्छाम
गच्छ	गच्छतम्	गच्छत
गच्छतु	गच्छताम्	गच्छन्तु

POTENTIAL. विधिलिङ् ।

गच्छेयम्	गच्छेव	गच्छेम
गच्छेः	गच्छेतम्	गच्छेत
गच्छेत्	गच्छेताम्	गच्छेयुः

आर्धधातुकरूपाणि ।

Non-Conjugational Tenses.

PERFECT. लिट् ।

जगाम—जगम	जग्मिव	जग्मिम
जगमिथ—जगन्थ	जग्मथुः	जग्म
जगाम	जग्मतुः	जग्मुः

Non-Conjugational Tenses.—(*Continued.*)

FIRST FUTURE. लुट् ।

गन्तास्मि	गन्तास्वः	गन्तास्मः
गन्तासि	गन्तास्थः	गन्तास्थ
गन्ता	गन्तारौ	गन्तारः

SECOND FUTURE. लृट् ।

गमिष्यामि	गमिष्यावः	गमिष्यामः
गमिष्यसि	गमिष्यथः	गमिष्यथ
गमिष्यति	गमिष्यतः	गमिष्यन्ति

CONDITIONAL. लृङ् ।

अगमिष्यम्	अगमिष्याव	अगमिष्याम
अगमिष्यः	अगमिष्यतम्	अगमिष्यत
अगमिष्यत्	अगमिष्यताम्	अगमिष्यन्

BENEDICTIVE. आशीर्लिङ् ।

गम्यासम्	गम्यास्व	गम्यास्म
गम्याः	गम्यास्तम्	गम्यास्त
गम्यात्	गम्यास्ताम्	गम्यासुः

AORIST. लुङ् ।

अगमम्	अगमाव	अगमाम
अगमः	अगमतम्	अगमत
अगमत्	अगमताम्	अगमन्

स्था (तिष्ठ्) = to stand, Parasmaipada.

सार्वधातुकरूपाणि ।

Conjugational Tenses.

PRESENT. लट् ।

तिष्ठामि	तिष्ठावः	तिष्ठामः
तिष्ठसि	तिष्ठथः	तिष्ठथ
तिष्ठति	तिष्ठतः	तिष्ठन्ति

IMPERFECT. लङ् ।

अतिष्ठम्	अतिष्ठाव	अतिष्ठाम
अतिष्ठः	अतिष्ठतम्	अतिष्ठत
अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्

IMPERATIVE. लोट् ।

तिष्ठानि	तिष्ठाव	तिष्ठाम
तिष्ठ	तिष्ठतम्	तिष्ठत
तिष्ठतु	तिष्ठताम्	तिष्ठन्तु

POTENTIAL. विधिलिङ् ।

तिष्ठेयम्	तिष्ठेव	तिष्ठेम
तिष्ठेः	तिष्ठेतम्	तिष्ठेत
तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः

आर्धधातुकरूपाणि ।

Non-Conjugational Tenses.

PERFECT. लिट् ।

